मद से युक्त शत्रुरूपी हाथी के मस्तक के कुम्भरूपी बिल में प्रवेश करने से लाल फड़कती हुई फण वाला स्फुटित हुए, मोतियों के समूहों से धारा से प्रचण्ड दाँतोंवाला लड़ाई में जिसके प्रचण्ड दाँत है, बाहुदण्ड में चन्दन की लता के समान तलवाररूपी लता रखने वाला उरगेन्द्र है ।। 7

त्याग, क्षमा, वे दो शास्त्रों के श्रवण, पराक्रम, अच्छे स्वभाव, शूरता, ढिठाई, सत्व, बल, बुद्धि और गुणों से युक्त छः गुणों के ज्ञाता, तीन प्रकार की शक्तियों से युक्त आत्मा पर विजयी, जिसने योगों की रक्षा की, मनु के तुल्य सुन्दर नीति, अनीति का ज्ञाता था ।। 8

V.V. 9 -11= Correspond respectively with verses 10,22 and 27 of No.55 of RCM.

उसके द्वारा अर्थात् राजाओं के सिर से धारण किये हैं, शासन हैं जिसके रत्न के समान उज्ज्वल सुन्दर पत्रवाली लता का समूह है जिसमें ऐसे सुवर्ण से रचित विमान को तथा उस विमान को हिम आदि से आच्छादित शिवपुर में परमेश्वर के लिए भक्ति से समर्पित किया गया ।। 12

और अन्य उपकरणों को युद्ध से निवृत्त होने पर चाँदीयुक्त सुवर्णों को जो विशेष रूप से शोभनेवाले थे ऐसे चित्रों को इस शिव की पूजा की विधि में, उस परम धार्मिक राजा रूप सिंह ने समर्पित किया था ।। 13

भृत्य आदि से पूरित पुर से लायी हुई जीविका और सम्पत्ति से सम्यक् प्रकार से तर्पित अतिथिजन आदि उस एक वीर ने ये दो इन्द्राश्रम, श्रेष्ठ तड़ाग सहित भोग, उपभोग, परिभोगों से युक्त विधान किया ।। 14

जो श्री इन्द्रवर्मन से परिकल्पित इस महादेव के धन को लुप्त करें वे बहुत-बहुत काल तक नरक में बसें और जो प्रसिद्ध बुद्धिवाले सर्वतोभावेन इसका पालन करें, अपने बन्धु-बान्धवों के साथ कल्याणकारिणी गति प्राप्त करें ।। 15

37

प्रसत कोक पो अभिलेख

Prasat Kok Po Inscription

गकोर थोम के निकट पश्चिमी बारे के करीब एक मील उत्तर बसे हुए चार मन्दिरों के समूह का नाम 'प्रसत कोक पो' है । यह अभिलेख मन्दिर में संस्कृत तथा ख्मेर भाषाओं में खुदा हुआ है ।

संस्कृत-भाषा में उत्कीर्ण अभिलेख विष्णु की वन्दना से प्रारम्भ होता है । अभिलेख से हमें किसी पण्डित के परिवार की वंश-परम्परा का पता चलता है । यह जयवर्मन द्वितीय (802-850) को मनु के समान राजा बतलाता है । उसका प्रिय नाम भागवत कवि था तथा उसके पिता श्री स्वामी वेद, व्याकरण तथा दर्शनशास्त्र में पूर्ण पारंगत थे । इस बात की पुष्टि हमें इस अभिलेख के अध्ययन से होती है । राजा की ओर से उस पण्डित पुजारी को 'पृथिवीन्द्र पण्डित' की उपाधि तथा सोने की पालकी दी गयी थी । अभिलेख के ख्मेर-भाग में श्वेतद्वीप में श्री पुण्डरीकाक्ष को दिये गये दान का विस्तृत विवरण है ।

जॉर्ज सेदेस ने इसका सम्पादन किया है।[1]

---

1. *BEFEO*, Vol. XXXVII, p.387

सिद्धिः ।

नमोस्तु चक्रिणेचक्रं पाणौ यस्यातिलोहितम् ।
दैत्यकोपाग्निसंघातो दृप्तौ युद्ध इवादतः ॥ 1
भाति श्रीपुण्डरीकाक्षो योङ्घ्रि सौन्दर्य्यसम्पदा ।
विनापि योगज्जगतां साक्षादिम पुरःस्थितः ॥ 2
जितं श्रीकपिलाख्येण यस्येदं रूपमुत्रमम् ।
नृणां दृष्टिवतान्नित्यं हृदयान्तर संस्थितम् ॥ 3
आसीत् भूपो महावंशो वेदयुग्माद्रिराज्यमाक् ।
नाम्ना श्रीजयवर्म्मा यः ख्यातौ भूमौ मनुर्य्यथा ॥ 4
तस्यासीत् परमेशस्य योऽपि भागवतः कविः ।
अतिवल्लभतापन्नो विद्ययातिविशुद्धया ॥ 5
माननीयो गुरुः शास्ता विष्णुलोकः स्थितस्ययः ।
परमेश्वर पुत्रस्य राज्ञः श्रीजयवर्म्मणः ॥ 6
योपि श्रेष्ठपुरे धर्म्मपूर्ण्णे धर्म्मेण निर्म्मिते ।
पारम्पर्य्येण संप्राप्तमातृवंशोदयोभवत् ॥ 7
श्रीस्वामी यस्य च पिता वेदव्याकरणोत्तम : ।
तर्क्काभिपारगो विप्रो ब्रह्मैवेकं मुखन्दधत् ॥ 8
पृथिवीन्द्रपण्डिताख्यां दत्तान्तेन श्रियोज्ज्वलां विभवैः ।
निर्ज्जित सकल कवि वृषो यो यातः स्वर्णदोलाद्यैः ॥ 9
इष्टस्थापकदत्तैर्ग्रहमुनितुरगैरतिष्ठिपत् प्रतिमाम् ।
शुचिशशिदिने हरेश्चन्द्रग्रहणे यः श्रीनिवासकविः ॥ 10
तस्यैवभागिनेयी दुहितरि यः श्री जयेन्द्रवर्म्माख्यात् ।
आचाररुचिरचरितो भागवतोभूत् अमृतगर्भः ॥ 11
यः स्वर्गते गुरौ स्वे वंश्ये गुववित्त बुद्धिचारित्रैः ।
....मतिनिधिर्भवत् कर्त्तुमनेक क्रियां धर्म्मर्याम् ॥ 12
.............न्ये तत्र युवापीष्टमिष्टकाग्राम् ।
...............म इवोत्थितामिदंस्थिरं भक्तेः ॥ 13
यज्ञा(ι)...............इष्टकायां शराम्बराष्टशाके ।
याः कृत्वा......यं हरेरतिष्ठिपद् भूयः ॥ 14

तस्यैव भागि..............केशवोमृतोयूतम् ।
इज्याशिलौ गुणिनौ प्रहारसहौ मतौ राज्ञाम् ॥ 15
सौदर्य्यो स्थिरभाग्यौ स्थिरकरुणौ भूभृतां स्थिरप्रज्ञौ ।
वंशयस्य पुण्यवृद्धौ कृतरक्षौ सर्व्वहिंस्त्रेभ्यः ॥ 16

अर्थ–

सिद्धि प्राप्त हो । उस विष्णु को नमस्कार है जिसके हाथ में अतिशय लाल चक्र सोहता है, दैत्यों के क्रोध रूप अग्नि समूह युद्ध के समान लाया हुआ ॥ 1

शोभते हैं वे कमल के समान आँखोंवाले विष्णु भगवान् जो अपने चरण के सौन्दर्य रूप सम्पत्ति से बिना योग के भी चौदहों भुवनों के मानों आगे ही स्थित हैं ॥ 2

जिनका यह उत्तम रूप भी कपिल नामक के द्वारा जीता गया है। दृष्टिवाले विद्वान् लोगों के नित्य हृदय के अन्दर सम्यक् तथा स्थित है जो मूर्ति ॥ 3

बड़े कुलवाला राजा था जो एक सौ चौबीस राज्यों का स्वामी था तथा जो जयवर्मन नाम से प्रसिद्ध था और पृथिवी पर मनु के समान प्रसिद्ध था ॥ 4

उसके उस राजा के जो भी भगवद्भक्त कवि थे अतिशय प्रिय हुए अपनी अतिशय विशुद्ध विद्या द्वारा राजा के अतिशय प्रिय हुए थे ॥ 5

परमेश्वर के पुत्र राजा श्रीजयवर्मन के विष्णुलोक में स्थित होने पर याने स्वर्गीय होने पर माननीय गुरु शासक हुए थे ॥ 6

जो भी वह धर्म से पूर्ण धर्म से निर्मित श्रेष्ठपुर में परम्परा से प्राप्त माता के वंश का उदय करने वाला हुआ ॥ 7

जिसके पिताजी श्रीस्वामी जो वेद और व्याकरण में उत्तम ज्ञाता थे, तर्कशास्त्र की सभी विधाओं में पारंगत थे, ब्राह्मण थे । एक ही ब्रह्म है दूसरा नहीं, ऐसी बात बराबर मुख में रखते थे ॥ 8

'पृथिवीन्द्रपण्डित'– इस उपाधि को उसके द्वारा दिये गये विभवों से श्रीलक्ष्मी और शोभा से उज्ज्वल उपाधि को प्राप्त थे जिनने सभी कवि रूप विद्वानों को जीत लिया था तथा जो सुवर्णरचित डोले पर चलनेवाले थे ॥ 9

जिस श्रीनिवास कवि ने इष्ट की स्थापना करनेवाले के द्वारा 779

शकाब्द में प्रतिमा की प्रतिष्ठा की थी ।। 10

उसकी ही बहन की बेटी की बेटी जो श्री जयेन्द्रवर्मन नामक आचार्य से सुन्दर चरितवाला भगवान् का भक्त अमृतगर्भ हुआ ।। 11

जो अपने गुरु के स्वर्गीय होने पर अपने वंश में उत्पन्न गुण, धन, बुद्धि और सुन्दर चरितों से बुद्धि का ख़ज़ाना हुआ अनेक धार्मिक क्रियाओं के करने के लिए ।। 12

जो वहाँ जवान भी इष्टरूप ईंटों के अग्रभाग को..........म...........के समान उठे हुए इस भक्ति से स्थिर को............।। 13

जिस राजा ने इष्टियों में यज्ञ करके जिन भगवान् हरि की स्थापना की ।। 14

उस राजा केशव की मृत्यु हो जाने के बाद उसके दोनों भांजे जो सहोदर भाई थे, यज्ञ करनेवाले थे, गुणवान्, प्रहार सहन करनेवाले शक्तिशाली, राजा के मन्त्री थे, अचल भाग्यशाली, दृढ़ करुणामय थे, राजाओं में उच्च अध्यात्म ज्ञानसम्पन्न कुल के पुण्य को बढ़ानेवाले तथा शत्रुओं से रक्षा करनेवाले थे ।। 15-16

बान बंग के अभिलेख

Ban Bung Ke Inscription

आज यह अभिलेख थाईलैण्ड के उबोन प्रान्त के बान बंग नामक ग्राम में प्राप्त एक खड़े पत्थर पर शिलालेख के रूप में मिलता है। इस अभिलेख में शक संवत् 808 (886 ईस्वी) में सोमादित्य के द्वारा त्रैलोक्यनाथ की पत्थर मूर्ति की स्थापना का वर्णन है । यह एक बौद्ध देवता की मूर्ति है । यह अभिलेख दान देनेवाले के पिता के मोक्ष के लिए विभिन्न प्रकार के खेतों, बागीचों, नौकरों और भैंसों से दान की भी चर्चा करता है । इस अभिलेख का राजनीतिक महत्त्व इस बात में पाया जाता है कि यह राजा इन्द्रवर्मन की शासकीय क्षेत्र की सीमा को डांगरोक पर्वत के उस पार तक विस्तृत कर देता है ।

इस अभिलेख का विस्तृत विवरण हमें BEFEO, Vol. XXII, p.63 में मिलता है ।

मूर्त्तिर्व्योमाष्टभूते शकपतिसमये कल्पिते भूमिभागे
सोमादित्यस् स...........फलजनितश् श्रीन्द्रवर्मावनीशे ।

मोक्षायास्थापयद् यो जननमरगतेस् संप्रवृद्धाय नृणां
मूर्त्रीन् त्रैलोक्यनाथं सकलमुनिपतेस् संज्ञया शैलरूपीम् ॥ 1
क्षेत्रारामं -भृत्यमहिषानि च यद् धनम् ।
दत्तन्तस्म मुनीन्द्राय तत्तेन पितृमुक्तये ॥ 2
सुवर्णरजतादीनि रत्नानि विविधानि च ।
कंसताम्रा - - नि दत्तान्येतानि सर्व्वशः ॥ 3
विना पुण्याश्रय ..... तत् मूर्खाश्च हरन्ति ते ।
क्रमिका - श ऋद्धानां योनिं यान्तु सवान्धवाः ॥ 4
ये ये कुर्वन्ति वृद्धाय देवद्रव्याणि यत्नतः ।
ते ते दिव्यसुखापन्नाः स्मृद्धयन्तु विविधोदयैः ॥ 5
- - - श्रमण ब्राह्मणादयः ।
- - - - यथा विभववांस् सुखम् ॥ 6
सर्व्व - - - भवगत्यनवस्थिताः ।
अनेन पुण्यविधिना सुखैकान्तं लभन्तुते ॥ 7

अर्थ–

801 शकाब्द में कल्पित भूमि भाग में चन्द्र सूर्य फल से उत्पन्न श्रीइन्द्रवर्मन राजा के रहने पर मोक्ष के लिए स्थापित किया, मानवों के जन्म-मरण गति की वृद्धि के लिए त्रैलोक्यनाथ को सभी मुनियों के स्वामी की संज्ञा से पर्वत रूपी को स्थापित किया ॥ 1

खेत, वाटिका.........नौकर और भैंसे जो धन दिये गये उस मुनीन्द्र को सो उसके द्वारा अपने पितरों की मुक्ति के लिए ॥ 2

बहुत सोने-चाँदी आदि और रत्न अनेक प्रकार के कंसताम्रा..........इतने सब कुछ सभी प्रकारों से दिये गये ॥ 3

बिना पुण्य के आश्रय से .... जो मूर्ख हैं वे हरते हैं, वे बान्धव सहित खराब योनि में वे जायें ॥ 4

जो-जो व्यक्ति देव द्रव्यों की वृद्धि के लिए कार्य करें, वे सुन्दर सुखों से युक्त होकर विविध उदयों से समृद्ध हों ॥ 5

.........श्रमण और ब्राह्मण आदि........यथा विभववालों को वैसे स्थित थे सुखी थे ।। 6

............सर्व...........संसार की गति से नहीं अवस्थित थे । इस पुण्य विधि से एकान्त सुख वे पावें ।। 7

39

प्रह बट के खड़े पत्थर अभिलेख

Prah Bat Stele Inscription

कोन प्री या चुंग प्री जिला में प्रह बट नाम का यह स्थान बसा हुआ है । वहाँ की प्रचलित वर्णमाला में यह शिलालेख खड़े पत्थर में ही एक ओर उत्कीर्ण है । उस पत्थर की दूसरी तरफ़ यह उत्तरी भारतीय लिपि में दुहराया गया है । इस शिलालेख का विषय एक सा है । निस्सन्देह अन्तिम पंक्ति समसामयिक कम्बुज-वर्णमाला में लिखा गया है ।

प्रारम्भ में ब्रह्मा, विष्णु तथा शिव देवताओं की आराधना की गयी है। इसके पश्चात् राजा यशोवर्मन की वंश-परम्परा प्रारम्भ होती है। उनके पिता के द्वारा इन्द्र तड़ाग नामक एक तालाब तथा स्वयं राजा के द्वारा यशोधर तटाक नामक दूसरे तालाब की खुदाई की चर्चा इसमें है । राजा ने गणेश देवता के उपलक्ष्य में चन्दन पर्वत पर 'यशोधराश्रम' नाम के एक विहार की भी स्थापना की । शेष अभिलेख में उस विहार को नियमित रूप में चालू करने के लिए नियमों की चर्चा है । विभिन्न इलाकों में पाये गये 11 खड़े पत्थरों पर यही बात दुहरायी गयी है ।

आर०सी० मजूमदार का मत है कि राजा ने जहाँ से पत्थर पाये हैं, उन सभी स्थानों पर यशोधराश्रम की स्थापना की गयी होगी ।[1]

यद्यपि ये शिलालेख ज्यादा ऐतिहासिक महत्त्व के नहीं हैं तथापि वे राजकीय परम्परा से हमें अवगत कराते हैं । उन सभी 11 स्थानों में, जहाँ खड़े पत्थर पाये गये हैं, आश्रम थे, लेकिन उन आश्रमों के सम्बन्धित देवी-देवताओं की पहचान नहीं दी गयी है । इस प्रकार यह प्रतीत होता है कि सम्भवतः ये स्वतन्त्र थे ।

संस्कृत के कुल 50 पद्य हैं जो सभी शुद्ध एवं स्पष्ट हैं । पद्य-संख्या 1, 17 से 50 अनुष्टुप, पद्य-संख्या 2, 4, 7 एवं 8 वसन्ततिलक, पद्य-संख्या 3, 5, 9 से 12, 14 एवं 15 उपजाति, पद्य-संख्या 6 उपेन्द्रवज्रा, पद्य-संख्या 13 इन्द्रवज्रा एवं पद्य-संख्या 16 मन्दाक्रान्ता है ।

सर्वप्रथम बार्थ ने इसका सम्पादन किया था ।[2]

उत्पत्तिस्थित सङ्घारकरणञ्जगतां पतीन् ।
नमन्तु मन्मथारातिमुरारि चतुराननान्
आसीदनिन्दितपुरेश्वरवङ्शजातश्
श्रीपुष्कराक्ष इति शम्भुपुराप्तराज्यः ॥ 1
राज्ञो महेन्द्रगिरिमूर्द्धकृतास्पदस्य ।
मातुः स्थिरस् समिति मातुलमातुलो यः ॥ 2
तद्वङ्शजो व्याधपुराधिराज-
सन्तानसंपादितमातृवङ्शः ।
राजेन्द्रवर्म्मेति गुणैकराशि-
रवाप यश् शम्भुपुरेपि राज्यम् ॥ 3
तस्याकलङ्कतुहिनाङ्शुविशुद्धकीर्त्तेः
पुत्रो बभुव नृपतिर्नृपतीन्द्रदेव्याम् ।
यो दृप्मशत्रुभुजगेन्द्रभुजङ्गशत्रु-
प्र्योधाग्रणीर्य्युधि महीपतिवर्म्मनामा ॥ 4

1. *IK*, p.75
2. *ISC*, p.355

अथ द्विजोऽगस्त्य इत्ति प्रतीतो
यो वेदवेदाङ्गबिदार्य्यदेशे ।
लब्धोदयो या महिषीद्धवङ्शा
यशोमतीति प्रथिता यशोभिः ॥ 5
सुतस्तयोर्य्यो युधि दुर्म्मदश् श्री-
नरेन्द्रवर्म्मेति नरेन्द्रवर्य्यः ।
महीपतेस्तस्य सुतेव लक्ष्मी-
र्न्नरेन्द्रलक्ष्मीरिति या वभूव ॥ 6
तस्यामरिद्विरदराजमृगाधिपेन
जन्येषु राजपतिवर्म्मनराधिपेन ।
राजेन्द्रदेव्यमरगर्भनिभोदपादि
या दिङ्मुखावलिविकीर्ण्णविशुद्धकीर्त्तिः ॥ 7
तस्यामजीजनदनेकनरेन्द्रसिङ्ह-
वङ्शोदयाय स महीपतिवर्म्मदेवः ।
देवीमनुत्तमबपुश्श्रियमिन्द्रदेवीं
दुग्धाब्धिधौतयशसन्तपतीमिवार्कः ॥ 8
अथाभवत् तस्य महेन्द्रशैल-
कृतस्थितेश् श्रीजयवर्म्मनाम्नः ।
नरेन्द्रवृन्दारकवन्दिताङ्घ्रे-
स् सूर्य्यद्युतिस् सूनुरनूनवीर्य्यः ॥ 9
महीपतिश् श्रीजयवर्द्धनो यो
गर्भेश्वरश् श्रीजयवर्द्धनाख्यः ।
राज्यस्थितश् श्रीजयवर्म्मनामा
महामहीपालशिरोधृताङ्घ्रिः ॥ 10
तस्याधिराजो जननीजनन्या
जघन्यजो जय्यपराक्रमो यः ।
रुद्रैकचित्तो रणरौद्रकर्म्मा
श्रीरुद्रवर्म्मेति विशुद्धधर्म्मा ॥ 11
तद्भागिनेयो गुणरत्नसिन्धु-

र्व्वसुन्धरादोहविदग्धबुद्धि ।
पृथूपमो यः पृथिवीन्द्रवन्द्यः
पृथ्वीपतिश् श्रीपृथिवीन्द्रवर्म्मा ॥ 12
राजन्यवङ्शाम्बरचन्द्रलेखा
श्रीरुद्रवर्म्मावनिपालकन्या ।
राज्ञी सती श्रीनृपतीन्द्रवर्म्म-
पुत्र्यास् सुता या सुरसुन्दरीव ॥ 13
तयोः कुमारोऽरिकरीन्द्रसिङ्हो
नृसिङ्हवन्द्यो नरसिङ्हदृप्तः ।
गो दिङ्मुखप्रेङ्खदखण्डकीर्त्ति-
र्य्यश् श्रीन्द्रवर्म्मा सकलां वभार ॥ 14
शिलामये वेश्मनि लिङ्गमैशं
श्रीन्द्रेश्वराभिख्यमतिष्ठिपद् यः ।
ईशस्य देव्याश्च समं पद[1]र्च्चा-
श्चखान च श्रीन्द्रतटाकमनोरम् ॥ 15
तेनैतस्यामवनिपतिना श्रीन्द्रदेव्यां महिष्यां
निश्शेषाशावितततयशसा तेजसामेकराशिः ।
भूभृत्पुत्र्यामिव पुरभिदोत्पादितः कार्त्तिकेय-
श् शक्तिं विभ्रद्रिपुकुलभिदं श्रीयशोवर्म्मदेवः ॥ 16
उत्तुङ्गान्युत्तमाङ्गानि वृद्धान्यन्यत्र भूभृतः ।
अत्युत्तुङ्गत्वमिच्छन्तोऽकुर्व्वन्यच्चरणाम्बुजैः[2] ॥ 17
गुरुस् सूरिवरैस् सर्व्वेर्व्वरस्त्रीभिर्म्मनोभवः ।
महेन्द्रो धरणीनाथैर्य्य एकोप्येवमीरितः ॥ 18
दैत्येन्द्रवक्षोनिर्भेदविद्यामिव गदाभृता ।
शिक्षितश् शीघ्रहस्तो यो युद्धोदृप्तद्विपद्धतौ ॥ 19
दग्धाङ्गस्याप्यनङ्गस्य स्थितं सौन्दर्य्यजं यशः ।

---

1. Read पङ्च्चा
2. ०म्बुजे would give better sense.

तद्दग्धुमिव[3] रुद्रेण यो नु कान्ततमः कृतः ॥ 20
यस्य भ्रमति सर्व्वत्र यशश्चन्द्राङ्शुनिर्म्मलम् ।
प्रतापशोषणभयाद् दुग्धाब्धिरिव दिङ्मुखे ॥ 21
यस्याध्वरानलोद्धूत[4] धूमधूपितमम्बरम् ।
नीलोत्पलदलश्यामन् नूनमद्यापि दृश्यते ॥ 22
यस्य तेजोनयवपुस्त्यागदिग्यौवनश्रियः ।
क्षमोत्साहगुणाश्लाघायशोधर्म्मध्यलङ्कृताः ॥ 23
येन वर्द्धितधर्म्मेण दधता वसुधोद्धृतिम् ।
माधवेनेव विध्वस्तः क्काप्यधर्म्मः प्रधावति ॥ 24
खड्गास्खलितपातेन पुनर्म्मिश्राङ्गखण्डनात् ।
सुस्थिताद् येन नान्यो द्विड् द्विरुच्छिन्नोऽपतद्युधि ॥ 25
यं वीक्ष्य विस्मयो धातुरितीवायं प्रजापतिः ।
आत्मनः प्रतिसृष्टो मे किमभूत् परमेश्वरः ॥ 26
द्वाभ्यामवार्य्यवीर्य्याभ्यान्नाथवद्विष्टपद्वयम् ।
लोकोऽयञ्जयिना येन महेन्द्रेण त्रिविष्टपः ॥ 27
भूरिरत्नसुवर्ण्णादिदक्षिणानां सुदक्षिणः ।
कोटिहोमादियज्ञानामाहर्त्ता यो महीपतिः ॥ 28
वसुधैकपुरे यस्य बाहुप्राकारपालिते ।
नोद्योगो योगिनां शान्तौ केवलं धन्विनामपि ॥ 29
येन तुल्यं भवेद्वक्त्रमेकस्यापि पुरा यदि ।
मुखोपमानताञ्श्चन्द्रो नानीयेत विपश्चिता ॥ 30
समरे यं समुद्वीक्ष्य दुर्म्मदारातिमण्डलम् ।
दुस्सहं मस्तकाम्भोजै रविरित्यभ्यपूजयत् ॥ 31
चतस्रश् शिवयोरर्च्चा यश् श्रुतीरिव पावनीः ।
द्वीपे श्रीन्द्रतटाकस्य पितृभूत्यै समं व्यधात् ॥ 32

---

3. Bergaigne has amended it as दग्धमिव, but the text, as it is, gives better sense.
4. Bergaigne has amended it as ०नलोद्धत, but the text, as it is, gives better sense and metre.

दीर्घवृत्तोरुकठिनं स्वभुजस्पर्द्धयेव यः ।
लोहमेकासिपातेन त्रिखण्डं समखडयत् ॥ 33
यस् सव्यदक्षिणक्षिप्तशरो हरिसुहृद् युधि ।
एको गोग्रहणे वीरो जहार विजयश्रियम् ॥ 34
यशश्चन्द्रदमक्षोभं कम्बुजेशान्वयाम्बरे ।
यशोधरतटाकाख्यं यश्चकार पयोनिधिम् ॥ 35
यशोधराश्रमे दत्ते श्रीमतीन्द्वेकमूर्त्तिभिः ।
चन्दनाद्रिगणेशाय शासनं स व्यधादिदम् ॥ 36
रत्नकाञ्चनरूप्यादिगवाश्वमहिषद्विपाः ।
नरनार्य्यो धरारामा यानि चान्यानि कानिचित् ॥ 37
तानि सर्व्वाणि दत्तानि श्रीयशोवर्म्मभूभुजा ।
स्वाश्रमेऽस्मिन्नहार्य्याणि राज्ञापि किमुतेतरैः ॥ 38
राजकुट्यन्तरे राजद्विजातिनृपसूनवः ।
विशेयुरत्र निर्दोषन् त एवाभरणान्विताः ॥ 39
तदन्यस्तु स सामान्य जनो नोद्धतवेषणः ।
नन्द्यावर्त्त विना पुष्पन्न मालादिविभूषितः ॥ 40
कर्ण्णभूषां बिना तन्वीं न हैमं भूषणं भजेत् ।
भोज्यानि नैव भुञ्जीत न खादेत् क्रमुकन्तथा ॥ 41
कलहन्न च कुर्व्वीत सामान्यो न विशेदपि ।
दुश्शीला यतयस् सर्व्व न शयीरन् कदाचन ॥ 42
ब्राह्मणा वैष्णवाश शैवा जनाश् शिष्टाश्च शीलिनः ।
शयीरन् सर्व्व एवैते जपध्यानसमन्विताः ॥ 43
अन्तरेणैव राजानं पुरस्तादागतौ[1] बहिः ।
परा नाच्छादितश्छत्रैर्य्यानादवतरेदपि ॥ 44
आश्रमे यः कुलपतिर्न्नियुक्तस्तापसोत्तमः ।
तेनान्नपानक्रमुकैराचारैः प्रश्रयादिभिः ॥ 45
अतिथीनान् द्विजादीनां भूपालसुतमन्त्रिणाम् ।

1. ०गतो gives a better meaning.

बलाधिपानां शैवानां वैष्णवानान्तपस्विनाम् ॥ 46
श्रेष्ठानां मनुजानाञ्च सामान्यानां प्रयत्नतः ।
यथाक्रमं विधातव्यं सर्व्वदा परिपूजनम् ॥ 47
कल्पितं ये विलुम्पेयुल्लङ्घयेयुश्च शासनं ।
ते यान्तु नरकं यावत् स्थितौ चन्द्रदिवाकरौ ॥ 48
अनुकुर्य्युरिदं ये तु शासनं परिकल्पितम् ।
वर्द्धयेयुश्च पुण्यस्य फलार्द्धं प्राप्नुवन्तु ते ॥ 49
अम्बुजेन्द्रप्रतापेन कम्बुजेन्द्रेण निर्म्मितम् ।
अम्बुजाक्षेण तेनेदं कम्बुजाक्षरमाख्यया ॥ 50

अर्थ–

जगत् की उत्पत्ति, पालन और संहार के कारणीभूत जगत्पति कामशत्रु भगवान् शिव, मुरशत्रु भगवान् विष्णु (कृष्ण) और चतुर्मुख ब्रह्मदेव को नमस्कार करनेवाले अनिन्दितपुर के महाराजा के वंश में उत्पन्न श्री पुष्कराक्ष नामक राजा थे जिन्होंने शम्भुपुर का राज्य भी प्राप्त किया था ॥ 1

महेन्द्रगिरि शिखर पर जिसने अपने को स्थापित किया तथा जिसकी माता का मामा का मामा जो युद्ध में धीर था उसके वंश में उत्पन्न, मातृवंश से व्याधपुर राज्य प्राप्त गुणों की खान राजेन्द्रवर्मन नाम का था जिसने शम्भुपुर का राज्य भी प्राप्त किया ॥ 2-3

उस कलंकहीन चन्द्रमा के समान विमल कीर्तिवाले राजा की पत्नी नृपतीन्द्र देवी से एक पुत्र हुआ जो शक्तिशाली सर्प राजाओं के समान शत्रुओं के लिए सर्पशत्रु गरुड़ ही था तथा युद्ध में योद्धाओं का अग्रणी था, उसका नाम महीपतिवर्मन था ॥ 4

अगस्त्य नामक ब्राह्मण, जिसने देश में वेद-वेदाङ्ग का प्रसार किया था, उसके महान् कुल में उत्पन्न उनकी महारानी यशोमती, जो अपनी विस्तृत कीर्ति के कारण ही यशोमती थी ॥ 5

उन दोनों का युद्ध में अपराजेय पुत्र राजाओं में श्रेष्ठ नरेन्द्रवर्मन था । उन्हीं महाराज महीपतिवर्मन को पुत्र के समान तथा लक्ष्मी के समान पुत्री

नरेन्द्रलक्ष्मी हुई ।। 6

उसी नरेन्द्रलक्ष्मी देवी से गजेन्द्ररूपी शत्रुओं के विनाशकर्ता सिंह के समान महाराज राजपतिवर्मन ने राजेन्द्र देवी को जन्म दिया जो देवमाता के गर्भ की उत्पाद के समान थी तथा जिनका विशुद्ध यश चारों दिशाओं में फैला हुआ था ।। 7

उन्हीं देवी (नरेन्द्रलक्ष्मी) से महाराज महीपतिवर्मन ने वंश-विस्तारार्थ राजाओं में सिंह के समान अनेक राजपुत्रों को जन्म दिया तथा इन्द्रदेवी नाम की एक कन्या को, जो क्षीरसागर के क्षीर से धोयी गयी सी प्रतीत होती थी तथा यश विस्तार के कारण जो तपते हुए सूर्य के समान प्रतीत होती थी, जन्म दिया ।। 8

इस प्रकार महेन्द्र पर्वत पर निवास करते हुए महीपतिवर्मन के महाशक्तिशाली पुत्र जयवर्मन उत्पन्न हुए । सूर्य के समान तेजस्वी जयवर्मन के चरणों की वन्दना राजागण और देवतागण भी करते थे ।। 9

महाराज श्रीजयवर्मन जन्म से जयवर्द्धन नाम के थे परन्तु राज्यारोहण होने पर जयवर्मन कहे गये, जिनके चरणों पर बड़े-बड़े राजा अपना मस्तक रखते थे ।। 10

उन अधिराज महाराज जयवर्मन की नानी का सबसे छोटा पुत्र श्री रुद्रवर्मन नाम के थे जो युद्धभूमि में घोर पराक्रमी (भयानक) योद्धा थे तथा जो भगवान् रुद्र के अनन्य भक्त तथा शुद्ध धर्माचरण वाले थे ।। 11

उनकी बहन का पुत्र (भगिना) गुणरूपी रत्नों से भरे रत्नसागर के समान, व्युत्पन्न मतिवाले तथा सम्पूर्ण पृथिवी का दोहन करनेवाले महाराज पृथु के समान महान् पराक्रमी एवं राजाओं से वन्दित महाराज पृथिवीन्द्रवर्मन थे ।। 12

राजकुलरूपी आकाश में चन्द्रलेखा के समान श्री रुद्रवर्मन की पुत्री थी । उनकी सती रानी नृपतीन्द्रवर्मन की बेटी की देवाङ्गनाओं के समान सुन्दरी बेटी थी ।। 13

इन दोनों राजा-रानियों से उत्पन्न राजकुमार, जो शत्रुरूपी हाथियों का संहारक सिंह के समान था तथा भगवान् नृसिंह के समान तेजस्वी एवं सभी दिशाओं में अखण्ड कीर्ति फैलानेवाला था, जिसका नाम श्री इन्द्रवर्मन था ।। 14

इन्हीं श्री इन्द्रवर्मन ने पत्थरों से बने मन्दिर में श्रीन्द्रेश्वर नामक शिवलिङ्ग की स्थापना की थी । महाराज श्री इन्द्रवर्मन एवं महारानी ने समान भक्तिभाव से भगवान् शिवजी की आराधना की तथा श्रीन्द्रतालाब खुदवायी और आश्रम बनवाए ।। 15

उन्हीं महाराज श्री इन्द्रवर्मन जिनके निर्बाध यश-विस्तार से दिशाओं का तेज एकराशि हुआ था । उन्होंने अपनी पटरानी से, जो राजपुत्री थी, सभी बन्धनों से मुक्त प्रथित यशवाली पर्वतराज पुत्री पार्वतीपुत्र असुरपुर विनाशक कार्तिकेय के समान श्री यशोवर्मन नामक पुत्र उत्पन्न किया जो शक्तिशाली शत्रुओं का भी विनाशक हुआ ।। 16

दूसरे स्थानों के उन्नत मस्तकवाले बड़े वृद्ध राजागण और अधिक उन्नत होने की इच्छा से उनके चरणकमल में नत हो रहे थे ।। 17

सभी विद्वानों ने जिन्हें गुरु मान लिया था तथा सभी श्रेष्ठ नारियों द्वारा जिन्हें कामदेव मान लिया गया था, उन्हें सभी महाराजाओं द्वारा एकछच्त्र जगत्पति सम्राट् मान लिया गया ।। 18

दैत्यराज की छाती फाड़नेवाली, गदाधारिणी महाविद्या की तरह जो गदाधारी था तथा जिसने हस्तलाघव की शिक्षा प्राप्त कर ली थी, उसके द्वारा युद्ध में उग्र शत्रु भी मार गिराये गये ।। 19

भस्म हुए कामदेव के बचे रह गये सौन्दर्य यश को भी मानो जला देने की इच्छा से ही भगवान् शिव ने इसका सुन्दरतम रूप बनाया ।। 20

जिसके यश चन्द्रमा की किरणें सर्वत्र घूम रही थीं, अतः प्रताप शोषण के भयजनित वैवर्ण्य के कारण दिशाओं का मुख क्षीरसागर के समान सफेद हो गये थे ।। 21

जिसकी यज्ञाग्नि से उत्पन्न धूम से धूपित आकाश आज भी नीलकमल दल के समान नीला बना हुआ है ।। 22

जिसका तेजस्वी न्यायशरीर त्याग से भूषित होकर दिशाओं का यौवन सौन्दर्य बना हुआ था, उसका धर्म क्षमा, उत्साह, यश आदि उत्तम गुणों से सुशोभित था ।। 23

जिसके अभिवृद्ध धर्म के द्वारा पृथिवी को धारण करने के बाद अधर्म उसी प्रकार अपने लिए जगह खोजने लगा जिस प्रकार कृष्ण के द्वारा विध्वंस किये जाने पर भागा था ।। 24

युद्ध में उसके खड़े होने पर उसके तलवार के वार से और कोई नहीं अपितु उसके शत्रु का शरीर दो टुकड़े होकर गिर पड़ा ।। 25

जिसे देखकर चकित ब्रह्मा सोचने लगे क्या यह प्रजापति या प्रजाओं का स्वामी मेरी ही प्रतिसृष्टि (प्रतिकृति) है अथवा क्या स्वयं परमात्मा का अवतार है ।। 26

इन्द्र और इस राजा की अनिवार्य शक्ति के कारण दोनों लोक सनाथ हुए । यह भूलोक इस लोक जयी राजा के कारण तथा इन्द्र के कारण स्वर्ग ।। 27

जो राजा (पृथिवीपति) दाक्षिण्यादि गुणयुक्त वह बहुत से सुवर्ण-रत्न दक्षिणावाले एक करोड़ यज्ञों का कर्ता भी हुआ था ।। 28

सम्पूर्ण पृथिवी एक नगर की भाँति उसकी भुजारूपी सीमा में पालित होते रहने पर योगियों की साधना नहीं रुकी, अवश्य ही धनुर्धारियों का काम बन्द हो गया ।। 29

पहले यद्यपि एकमात्र जिसके मुख की समता चन्द्रमा से बतायी गयी, परन्तु बाद में पण्डितों ने चन्द्रमा में उसके मुख की उपमानता नहीं पायी ।। 30

मतवाले शत्रु समूह युद्ध में जिसे देखकर उसके तेज को सहन न कर पा सकने के कारण उसे साक्षात् भगवान् सूर्य ही समझकर मस्तकरूपी कमल के फूलों से उसकी पूजा की ।। 31

श्रीन्द्र तालाब के द्वीप में स्थापित दोनों शिवलिङ्गों की समान भाव से पितरों की पुण्य-वृद्धि के लिए चारों पूजाएँ की जो पूजा वेदों के समान पवित्र कर देनेवाली थी ।। 32

जो युद्ध दायें हाथ से दाहिने ओर बाण चलाकर हरिहर के समान था तथा जगत् मण्डल में एकमात्र वीर था, वह जयलक्ष्मी का अपहरण कर लिया ।। 33

लम्बी, गोल और कठिन अपनी जंघा से ही स्पर्धा करनेवाली भुजाओंवाला वह तलवार के एक ही वार से ही एक लोहे को तीन बराबर टुकड़े में काट दिया ।। 34

जिसका यशरूपी उपराग रहित चन्द्रमा कम्बुज राजवंशरूपी आकाश में विचरण करता था, उसने यशोधर तालाब को क्षीरसागर के समान बनवाया ।। 35

यशोधर आश्रम में स्थित चन्दनाद्रिगणेश के लिए चन्द्रमा के मूर्तिभूत श्रीमान् महाराज यशोवर्मन द्वारा दान किये गये पदार्थों के लिए यह राज्यादेश घोषित किया गया ।। 36

रत्न, सोना, चाँदी, घोड़े, महिष, हाथी, नर-नारी (दास-दासी), ज़मीन, बगीचा और जो कुछ भी है ।। 37

वे सब महाराज यशोवर्मन द्वारा अपने इस आश्रम को दान में दिये गये हैं, उसे दूसरे राजाओं द्वारा चाहे वे अपने ही उत्तराधिकारी ही क्यों न हों, उनके द्वारा न लिया जाये ।। 38

राज आँगन में राजा, ब्राह्मण और राजकुमार जो निर्दोष हो आभूषणाभूषित प्रवेश पावें ।। 39

इनके अतिरिक्त अन्य सामान्यजन उद्धत वेष में, अप्रदक्षिण तथा फूलमाालादि से विभूषित प्रवेश न पावें ।। 40

नारियाँ कर्णाभूषण या स्वर्णाभूषणभूषित प्रवेश न पावें । भोज्य पदार्थ यहाँ न खाये जायं । पान-सुपारी भी न चबाये जायं ।। 41

यहाँ सामान्य जन हों या विशिष्ट लोग हों, आपस में कलह न करें । भ्रष्ट संन्यासी तथा सामान्य– सभी लोग यहाँ सोवें ।। 42

ब्राह्मण, वैष्णव, शैव, शिष्टजन, शीलवान् पुरुष यहाँ विश्राम करें तथा वे सब भी जो जप-ध्यान में लगे रहते हैं ।। 43

दूर से आये हुए राजागण सामने आने पर छत्र न लगावें और वाहन से भी नीचे उतर जायें ।। 44

आश्रम में उत्तम तपस्वी, जो कुलपति पद पर नियुक्त हैं, वे भी

खान-पान, सुपारी खाने के आचार नियमों का पालन करें। उसको बढ़ावा दें तथा आश्रम में आश्रितों द्वारा भी पालन करावें ।। 45

अतिथियों, ब्राह्मणों, राजपुत्रों, मन्त्रियों, सेनापतियों, शैवों, वैष्णवों, श्रेष्ठ मनुष्यों और सामान्य जनों को सदा ही प्रयत्नपूर्वक क्रमानुसार पूजा करनी चाहिए ।। 46-47

दान किये गये पदार्थों का जो हरण करें या इस राजादेश का उल्लंघन करें, वे चन्द्र-सूर्य की स्थिति तक नरकवासी हों ।। 48

जो इस राजाज्ञा का पालन करेंगे तथा दान की रक्षा करेंगे, उनकी पुण्यवृद्धि होगी तथा इस दान के फल का आधा प्राप्त करेंगे ।। 49

भगवान् कमलेश विष्णु की कृपा से कम्बुजेश्वर यशोवर्मन द्वारा यह निर्मित हुआ तथा राजादेश को अम्बुजाक्ष कम्बुज लिपि में लिखा या व्याख्यायित किया ।। 50

40

लोले-अभिलेख

Loley Inscription

गकोरवाट से लगभग 10 मील दक्षिण-पूर्व में लोले बसा हुआ है। मन्दिर के एक बड़े पत्थर के दोनों ओर यह अभिलेख उत्कीर्ण है। पूर्व के समान ही दोनों तरफ एक ही प्रकार का विषय लिखा है : एक ओर प्रचलित लिपि में और दूसरी ओर उत्तरी भारतीय वर्णमाला में।

यह अभिलेख भगवान् शिव की वन्दना से प्रारम्भ होता है और उसके बाद राजा यशोवर्मन की वंशावली दी गयी है। राजा के राज्यारोहण की तिथि तथा उसके राज्य की सीमा चीन देश तक विस्तृत होने की चर्चा इसमें है। इस राजा ने एक सौ आश्रमों की स्थापना की तथा अपने ही द्वारा चित्रित शिव एवं दुर्गा की चार मूर्तियों को रखा। यहाँ एक तालाब भी खुदवाया। अपने माता-पिता के धार्मिक कृत्य को बढ़ाने के लिए उन्होंने ऐसा किया। राजा के दानों में भिन्न-भिन्न प्रकार के उपस्कर, सोने तथा चाँदी के पात्र, नृत्य में दक्ष लोग, गाँव, खेत, वाटिका एवं गायें थीं।

साहित्यिक दृष्टिकोण से यह अभिलेख महत्त्वपूर्ण है; क्योंकि यह उस समय के संस्कृत-साहित्य के उच्चतम विकास को सिद्ध करता है। इस अभिलेख से हमें कालिदास एवं सुश्रुत के शब्दों की जानकारी प्राप्त होती है।

इस अभिलेख में पद्यों की संख्या 93 है तथा सभी स्पष्ट एवं शुद्ध हैं। पद्य-संख्या 1 से 3, 5, 8, 9 एवं 67 वसन्ततिलक; पद्य-संख्या 4, 6, 10, 11 से 13, 15 एवं 16 उपजाति; पद्य-संख्या 14 इन्द्रवज्रा; पद्य-संख्या 17 मन्दाक्रानता एवं पद्य-संख्या 18, 66 एवं 68 से 93 अनुष्टुप-छन्द के हैं। बार्थ ने इस अभिलेख का सम्पादन किया था।[1]

नमश् श्रीन्द्रवर्म्मेश्वराय।
प्राक् केवलोपि भगवान् रतये त्रिधा यो
भिन्नश्चतुर्मुखचतुर्भुजशम्भुमूर्तिः।
प्रारम्भ एव भुवनस्य पुनर्य्युगान्ते
कैवल्यमेति च शिवाय नमोस्तु तस्मैः ॥ 1
वन्देऽरविन्दरिपुमण्डितकेशवृन्दं
भक्त्यारविन्ददृशमप्यरविन्दयोनिम्।
नम्रामरेन्द्रदितिजेन्द्रशिखण्डबन्ध-
मन्दारषण्डमकरन्दसुगन्धिताङ्घ्रिम ॥ 2
तद्वङ्शजो व्याधपुराधिराज-
सन्तानसंपादितमातृवङ्शः।
राजेन्द्रवर्म्मेति गुणैकराशि-
रवाप यश् शम्भुपरेपि राज्यम् ॥ 3
तस्याकलङ्कतुहिनाङ्शुविशुद्धकीत्तेः
पुत्रो बभुव नृपतिनृपतीन्द्रदेव्याम्।
यो दृप्तशत्रुभुजगेन्द्रभुजङ्शत्रु-
र्य्योधाग्रणीर्य्युधि महीपतिवर्म्मनामा ॥ 4
अथ द्विजोऽगस्त्य इति प्रतीतो

1. *ISC*, p.391

यो वेदवेदाङ्गबिदार्य्यदेशे ।
लब्धोदयो या महिषीद्धवङ्शा
यशोमतीति प्रथिता यशोभिः ॥ 5
सुतस्तयोर्य्यो युधि दुर्म्मदश् श्री-
नरेन्द्रवर्म्मेति नरेन्द्रवर्य्यः ।
महीपतेस्तस्य सुतेव लक्ष्मी-
र्न्नरेन्द्रलक्ष्मीरिति या बभूव ॥ 6
तस्यामरिद्विरदराजमृगाधिपेन
जन्येषु राजपतिवर्म्मनराधिपेन ।
राजेन्द्रदेव्यमरगर्भनिभोदपादि
या दिङ्मुखावलिविकीर्ण्णविशुद्धकीर्त्तिः ॥ 7
तस्यामजीजनदनेकनरेन्द्रसिङ्ह-
वङ्शोदयाय स महीपतिवर्म्मदेवः ।
देवीमनुत्तमबपुश्श्रिसमिन्द्रदेवीं
दुग्धाब्धिधौतयशसन्तपतिमिवार्कः ॥ 8
अथाभवत् तस्य महेन्द्रशैल-
कृतस्थितेश् श्रीजयवर्म्मनाम्नः ।
नरेन्द्रवृन्दारकवन्दिताङ्घ्रे-
स् सूर्य्यद्युतिस् सूनुरनूनवीर्य्यः ॥ 9
महीपतिश् श्रीजयवर्द्धनो यो
गर्भेश्वरश् श्रीजयवर्द्धनाख्यः ।
राज्यस्थितश् श्रीजयवर्म्मनामा
महामहीपालशिरोघृताङ्घ्रिः ॥ 10
तस्याधिराजो जननीजनन्या
जघन्यजो जय्यपराक्रमो यः ।
रुद्रैकचित्तो रणरौद्रकर्म्मा
श्रीरुद्रवर्म्मेति विशुद्धधर्म्मा ॥ 11
तद्भागिनेयो गुणरत्नन्धि-
र्व्वसुन्धरादोहविदग्धबुद्धिः ।

पृथूपमो यः पृथिवीन्द्रवन्द्यः
पृथ्वीपतिश् श्रीपृथिवीन्द्रवर्म्मा ॥ 12
राजन्यवङ्शाम्बरचन्द्रलेखा
श्रीरुद्रवर्म्मावनिपालकन्या ।
राज्ञी सती श्रीनृपतीन्द्रवर्म्म-
पुत्र्यास् सुता या सुरसुन्दरीव ॥ 13
तयोः कुमारोऽरिकरीन्द्रसिङ्हो
नृसिंङ्हवन्द्यो नरसिंङ्हदृप्तः ।
गां दिङ्मुखप्रेङ्खदखण्डकीर्त्ति-
र्य्यश् श्रीन्द्रवर्म्मा सकलां वभार ॥ 14
शिलामये वेश्मनि लिङ्गमैशं
श्रीन्द्रेश्वराभिख्यमतिष्ठिपद् यः ।
ईशल्य देव्याश्च समं षद च्चर्चा-
श्चखान च श्रीन्द्रतटाकमग्रय्म् ॥ 15
तेनैतस्यामविनिपतिना श्रीन्द्रदेव्यां महिष्यां
निश्शेषःशावितयशसा तेजसामेकराशिः ।
भूभृत्पुत्रसामिव पुरभिदोत्पादितः कार्तिकेय-
श् शक्तिं बिभ्रद्रिपुकुलभिदं श्रीयशोवर्म्मदेवः ॥ 16
उत्तुङ्गान्युत्तमाङ्गनि वृद्धान्यन्यत्र भूभृतः ।
अत्युत्तुंगत्वमिछत्रोऽकुर्व्वन्यच्चरणाम्बुजैः ॥ 17
गम्भीराह्लादिवपुषोयतो जगति दुस्सहः ।
प्रससार प्रतापाग्निरग्निरेकार्ण्णवादिव ॥ 18
येन बद्धोद्धता कीर्त्तिरच्छिन्नगुणविस्तरैः ।
जीर्ण्णब्रह्माण्डखण्डस्य पुनः खण्डभयादिव ॥ 19
द्वितीयो यस्य गाम्भीर्य्ये सिन्धुरस्ति वलेऽनिलः ।
धैर्य्ये मेरुहेरिर्व्वीर्य्ये रूपे दग्धो न तु स्मरः ॥ 20
यत्र वीर्य्याहृता लग्ना श्रीस्यक्त्वा नृपमण्डलम् ।
दिङ्नागमदगन्धान्धा नालिमालाब्जमीक्षते ॥ 21
राज्यलक्ष्मीमवाप्यैव लक्ष्मीपतिपराक्रमः ।

यो धराममराकीर्ण्णाञ्चकारेवामरावतीम् ॥ 22
प्रतापतप्ते भुवने यस्य स्फुरदिवोष्मणा ।
भूदिगद्रिद्रुमद्रङ्ग समुदान् द्राग् द्रुतं यशः ॥ 23
नारायणः किल पुरा स्त्रीकृतोऽमृततृष्णया ।
स यद्रूपामृतं वीक्ष्य न जातु नु पुमान् भवेत् ॥ 24
पूर्ण्णोप्यधृष्यसत्त्वोपि गम्भीरोपि महानपि ।
यस्य याने जुघूर्ण्णारिर्म्मारुतस्येव सागरः ॥ 25
शमिना येन गुप्तापि कृत्ये शक्तिः प्रकाशिता ।
तापसामेन हरिणा नखालीव गुहौकसा ॥ 26
वभञ्ज रत्नरचितं भूभृत्पतिशिरो रणे ।
रतये यो जयश्रीभिः क्रीड़ाद्रिङ्कल्पयान्निव ॥ 27
घृष्टौ द्विषा शिखारत्नैरापिल मधुधारया ।
क्षालितौ रणरक्ताद्रौ यस्य पादौ ससंभ्रमम् ॥ 28
न चचाल चलापि श्रीस्तिष्ठन्ती यस्य वक्षसि ।
वक्त्रे सरस्वती वक्त्राद्विनयश्रवणादिव ॥ 29
अदक्षिणोपि वक्रोपि विधिर्य्यस्यान्वमन्यत ।
सर्व्वात्मनापदानानि तेजोनयभयादिव ॥ 30
शङ्के समधिकं यस्य गाम्भीर्य्यं सागरादपि ।
तथा हि तद्भियारातिरभ्यगाहत सागरम् ॥ 31
राष्ट्रे क्षेत्रे प्रतापाग्निदग्धदृप्तारिदोहदे ।
उप्तं श्रद्धाम्बुभिर्य्येन धर्म्मबीजं व्यवर्द्धत ॥ 32
येनोपमेयतां मन्ये कामः कान्तोपि नार्हति ।
स हि चेत् सार्व्वसर्व्वाङ्गो न पतङ्गायितोनले ॥ 33
होमयोगादिनिरतो वेदसक्तः प्रजापतिः ।
विधात्रा सदृशो योपि परैरचलितोऽभवत् ॥ 34
युधि खड्गसहायो यस् समन्द्वयमदर्शयत् ।
उद्दृप्तविद्विषां खण्डमखण्डञ्च निजं यशः ॥ 35
प्रजानुशासनो धर्म्मर्य्योगीश्वरपरायणम् ।
राजन्यवन्द्यचरणो योऽभून्मनुरिवापरः ॥ 36

अभ्रङ्कषं सुधाधौतमरिवेश्मेन्दुमण्डलम् ।
शक्तिर्य्यस्याकरोद्भूयो मृगाङ्कं वाष्पदुर्द्दिनम् ।। 37
अनेन चोदिता भूपा व्यजहन् मामितीव यम् ।
वीरमालम्ब्य वृद्धोपि राजधर्म्मोऽवधीत् कलिम् ।। 38
यो विपत्स्वपि सद्वृत्तिं नन्दिनीं सर्व्वकामदाम् ।
प्रजासंपत्करीन्धेनुं दिलीप इव नाजहात् ।। 39
यस्यासङ्ख्यमखोद्धूतधूमजालैस्तरङ्गिभिः ।
शतक्रतुपदाक्रान्तिमानस्सौपानवानिव ।। 40
यः प्रजानान्न निरगान्मुहूर्त्तमपि मानसात् ।
कलौ कापथसक्तानि मनांसि विनयन्निव ।। 41
करत्यागेन यस्यार्थो वर्द्धितो दिग्गजस्य हि ।
उत्सारणाम्बुजामोदो मदे लग्नालिवर्द्धनः ।। 42
जगन्मण्डलचेतांसि यो जग्राह वपुर्गुणैः ।
निर्ज्जितस्य मनोजस्य संश्रयामर्षणादिव ।। 43
विहाय प्रत्युपकृतिञ्जगत्युपचकार यः ।
एकदापि कदा सूर्य्यः प्रतिबोधेप्सुरम्बुजात् ।। 44
अर्थिप्रार्थितसर्व्वार्थव्यतिरिक्तार्थदानतः ।
दिव्यः कल्पद्रुमी येन भूमिभूतोपि दर्शितः ।। 45
चतुराश्रममर्य्यादां शासिता कल्पयन्नपि ।
आश्रमाणां प्रशस्तानां शतन्दिक्षु चकार यः ।। 46
दत्तवानेकदा रामः कश्यपाय महीमति ।
जिगीषयेव यो नित्यं हेमाद्रिमदिशद् द्विजे ।। 47
मेधाधीधीरताश्लाघाभद्रताकरुणार्द्रता ।
अन्यदौर्भाग्यभीत्येव कान्तास्ता यमुपासत ।। 48
सुश्रुतोदितया वाचा समुदाचाररया ।
एको वैद्यः परत्रापि प्रजाव्याधिञ्जहार यः ।। 49
सुवर्ण्णं स्वच्छमर्च्चिष्मत्स्निग्धं गुरुसमं नहत् ।
वसुधामपि गां भूयो राजरत्नं वभार यः ।। 50
यस् सर्व्वशास्त्रशस्त्रेषु शिल्पभाषालिपिष्वपि ।

नृत्तगीतादिविज्ञानेष्वादिकर्त्तव पण्डितः ॥ 51
सव्यापसव्यदोर्म्मुक्तैर्य्यो जहार जयश्रियः ।
वाणैस् सर्व्वाङ्गमुक्तैस्तु कामवाणैर्व्वराङ्गनाः ॥ 52
खरः खडगैकपातेन यस्याच्छेदि त्रिधा महान ।
लोहदण्डोरिमानस्तु दूरतश् शतधा स्वयम् ॥ 53
अत्रातिपूर्ण्णं स्वयशो नयन्निव रसातलम् ।
यश्चखानोरुगम्भीरं तटाकं श्रीयशोधरम् ॥ 54
यश्चक्रयन्त्ररन्ध्रेण लक्षं विद्धयन्वियत्स्थितम् ।
नार्ज्जुनः केवलं कीर्त्त्या भीमोऽभूदपि रङ्हा ॥ 55
चीनसन्धिपयोधिभ्यां मितोर्व्वी येन पालिता ।
गुणावलीव कीर्त्तिस्तु विद्येव श्रीरिवामिता ॥ 56
तत्त्वोक्तिरभवत् सर्व्वस्तवो यस्य गुणाहृतः ।
यद्यत् स्पृशति मेरौ हि सौवर्ण्णन्तत्तदीक्षितम् ॥ 57
श्रीयशोवर्म्मणा तेन श्रीयशोधर्म्मशोभना ।
राजेन्दुनेन्दुवक्त्रेण चन्द्रेन्दुवसुभूभुजा ॥ 58
इमास् स्वशिल्परचिता गुरूणां पुण्यवृद्धये ।
चतस्रश् शिवशर्व्वाणीप्रतिमस्थापितास् समम् ॥ 59
विचित्ररत्नरचितं भूषणङ्कनकाम्बरम् ।
करङ्कालधौताम्भोभाजनानि प्रतिग्रहाः ॥ 60
शिविकाव्यजनच्छत्रमायूरामत्रराशयैः ।
बहूनि हैमरौप्याणि पूजोपकरणानि च ॥ 61
इदञ्च स्वकृतन्तार तटाकं ह्लादिकान्तिभिः ।
चतुष्कोणीकृतन्त्वष्ट्रा विधुविम्बमिवामृगम् ॥ 62
नृत्तगीतादिचतुराश् श्लाघ्या नरवराङ्गनाः ।
समग्रकरदग्रामगोधराराममण्डलम् ॥ 63
इदन्तेन च तत् सर्व्वं सार्व्वं सङ्स्थापनादिने ।
दत्तं राजाधिराजेन जगज्ज्वलिततेजसा ॥ 64
श्रीन्द्रवर्म्मेश्वरादीनां देवानां सर्व्वकिङ्कराः ।
विश्वम्भराधिराजेन न नियोज्यास् स्वकर्म्मणि ॥ 65

आगमः परचक्रस्य राष्ट्रे यदि भवेत् तदा ।
नियोज्यास्तद्विनाशाय नान्यदा तु कदाचन ॥ 66

अत्राङ्गने नृपतिरेव नृपात्मजोपि
भूषाविभूषिततनुः खलु वीतदोषम् ।
द्वारेण तेन महतोपि विशेदभूषाश्
शिष्टास्तु विप्रयतिमन्त्रिबलाधिपाश्च ॥ 67

ब्राह्मणादिस् ससामान्यजनो नोद्धतवेशकः ।
कर्ण्णभूषां विना तन्वीं न हैमं भूषणं भजेत् ॥ 68

नन्द्यावर्त्तं विना पुष्पन्न मालादिविभूषितः ।
न खादेत् क्रमुकं मुक्त्वा नृत्तागारादिवाह्यतः ॥ 69

न नीलचित्रवसनो न कुर्य्यात् कलहन्तथा ।
न भोगाभ्यन्तरगतो न च शस्त्रधरो भवेत् ॥ 70

न कञ्चिदवमन्येत न गृह्णीयाच्च मानुषान् ।
एवमादीन्यकार्य्याणि कुर्य्यान्नात्र शिवाङ्गने ॥ 71

उदक् चतुम्मु खद्वारादाश्रमान्ताद् ब्रजन्नरः ।
परानाच्छादितश्छत्रैर्य्यानादवतरेदपि ॥ 72

यस् साधुः पूजनप्रार्थी पुरुषः स्त्रीजनोऽपि वा ।
यथाविभवपूजाभिः प्रविशेत् सोपि भक्तितः ॥ 73

शिष्टा द्रविणहीनास्तु श्रद्धाभक्तिमहाधनः ।
पुष्पेणापि विशेयुस्ते भक्तिर्हि परमा शिवे ॥ 74

छिन्नाङ्गास्त्वङ्कितङ्गाये कृतघ्नाः कुब्जवामनाः ।
महापातकिनो च हीनदेशास्तथा परे ॥ 75

ये कुष्ठादिमहाव्याधिपीड़िताङ्गा विगर्हिताः ।
कदाचिदपि ते सर्वे न विशेयुश् शिवाङ्गम् ॥ 76

माहेश्वरा जितात्मानः कुलशीलादिशोधिताः ।
ते देवपरिचर्य्यार्हा भवेयुश् शान्तमानसाः ॥ 77

ये शासनमिदन्दर्प्पाल्लङ्घयेर्य्यदि द्विजाः ।
वधदण्डाद्यनर्हत्वान्निर्व्वास्यास्त इतोङ्गनात् ॥ 78

राजपुत्रास्तु दाप्यास्ते हेमबिङ्शत्यलैर्म्मितम् ।

तदर्द्धकन्तु कार्य्यो नृपतिज्ञामन्त्रिणाम् ॥ 79
तदार्द्धकन्तु दाप्यास्ते हेमदण्डातपत्रिणः ।
तस्याप्यर्द्धन्तु मुख्यानां श्रेष्ठिनां विनयो मतः ॥ 80
दाप्यास्तदर्द्धविनयं शैववैष्णवकादयः ।
तस्याप्यर्द्धन्तु विनयस् सामान्येषु समीरितः ॥ 81
धनन्दातुमशक्तास् सामान्या यदि मानुषाः ।
पृष्ठे वेत्रेण तान् हन्याच्छतमित्यनुशासनम् ॥ 82
पूजा पूजोपकरणं कालश् शोचं प्रकल्पितम् ।
एतच्चान्यच्च सर्व्वेषु क्षीयेतंकतमद्यदि ॥ 83
कुलपत्यादयोऽध्यक्षा दाप्या दोषान्वितेषस् सह ।
हेमविङ्शत्पलाद्येकपलान्तकमनुक्रमात् ॥ 84
कुलपत्याद्यसंपृक्ते दोषे दोषकृदेव तु ।
यथार्हन्द्रविणन्दाप्यो दण्ड्यो वा देशकालतः ॥ 85
पूजाकालव्यतिक्रान्तो भवेद् यदि पुरोहितः ।
रूप्यं विङ्शत्पलन्दाप्यः पलानि दश याजकः ॥ 86
स्वकार्य्यं यद्युपेक्षेत द्वाराध्यक्षोऽथ लेखकः ।
रूप्यं पञ्चपलन्दाप्यस्त्रिपलन्तूपकल्पकः ॥ 87
कारी महानसाध्यक्ष आगमाध्यक्षकस्तथा ।
रूप्यन्ते त्रिपलन्दाप्यः अङ्नाधिपतिस्तथा ॥ 88
सुवर्ण्णरजतालभे द्रव्याण्यन्यानि दापयेत् ।
इत्येषा तापसाधीना मर्य्यादा स्थापिता भेवत् ॥ 89
याचते श्रीयशोवर्म्मा भाविकम्बुपतीश्वरान् ।
इमं रक्षत भद्रं वो धर्म्मं धर्म्मधना इति ॥ 90
एष भारो हि भूपानां कल्पितः परमेष्ठिना ।
पालनं पालनीयानान्दण्ड्यानान्ददण्डनञ्च यत् ॥ 91
एषां वसुहरा राज्ञा दण्ड्यास्ते यान्तु दुर्ग्गतिम् ।
पान्ति ये पातु तान्भूपस्तेपि यान्तु परं पदम् ॥ 92
अम्बुजेन्द्रप्रतापेन कम्बुजेन्द्रेण निर्म्मितम् ।
अम्बुजाक्षेण तेनेदं कम्बुजाक्षरमाख्यया ॥ 93

अर्थ–

श्रीन्द्रवर्मेश्वर को नमस्कार है ।

आदिकाल में जो एक और केवल एक थे, वे सृष्टिकार्य के लिए तीन रूपों में पृथक्-पृथक् चतुर्मुख ब्रह्मा, चतुर्भुज विष्णु और शिव रूप में हो गये, परन्तु युगादि और युगान्त काल में पुनः एक ही रूप में रहनेवाले भगवान् शिव को नमस्कार है ।। 1

भ्रमर के समान काले घुंघराले केशों से मण्डित केशयुक्त कमलनयन भगवान् विष्णु को, कमलोद्भव भगवान् ब्रह्मा को तथा देव दानवों द्वारा मन्दार गुच्छयुक्त मस्तक निरन्तर जिनके चरणों में लगाकर नमस्कार करते रहने के कारण जिनका चरण निरन्तर सुगन्धित रहता है, उन भगवान् शिव को भक्तिपूर्वक नमस्कार करता हूँ ।। 2

महेन्द्रगिरि शिखर पर जिसने अपने को स्थापित किया तथा जिसकी माता का मामा का मामा, जो युद्ध में धीर था, उसके वंश में उत्पन्न मातृवंश से व्याधपुर राज्य प्राप्त गुणों की खान राजेन्द्रवर्मन नाम का था जिसने शम्भुपुर का राज्य भी प्राप्त किया ।। 3

उस कलंकहीन चन्द्रमा के समान विमल कीर्तिवाले राजा की पत्नी नृपतीन्द्र देवी से एक पुत्र हुआ जो शक्तिशाली सर्प राजाओं के समान शत्रुओं के लिए सर्प-शत्रु गरुड़ ही था तथा युद्ध में योद्धाओं का अग्रणी था, उसका नाम महीपतिवर्मन था ।। 4

अगस्त्य नामक ब्राह्मण, जिसने देश में वेद-वेदांग का प्रसार किया था, उसके महान् कुल में उत्पन्न उनकी महारानी यशोमती, जो अपनी विस्तृत कीर्ति के कारण ही यशोमती थी ।। 5

उन दोनों का युद्ध में अपराजेय पुत्र राजाओं में श्रेष्ठ नरेन्द्रवर्मन था । उन्हीं महाराज महीपतिवर्मन को पुत्र के समान तथा लक्ष्मी के समान पुत्री नरेन्द्रलक्ष्मी हुई ।। 6

उसी नरेन्द्रलक्ष्मी देवी से गजेन्द्ररूपी शत्रुओं के विनाशकर्ता सिंह के समान महाराज राजपतिवर्मन ने राजेन्द्र देवी को जन्म दिया जो देवमाता के गर्भ की

उत्पाद के समान थी तथा जिनका विशुद्ध यश चारों दिशाओं में फैला हुआ था ।।7

उन्हीं देवी (नरेन्द्रलक्ष्मी) से महाराज महीपतिवर्मन ने वंश के विस्तार के लिए राजाओं में सिंह के समान अनेक राजपुत्रों को जन्म दिया तथा इन्द्रदेवी नाम की एक कन्या को, जो क्षीरसागर के क्षीर से धोयी गयी सी प्रतीत होती थी, तथा यश-विस्तार के कारण जो तपते हुए सूर्य के समान प्रतीत होती थी, जन्म दिया ।। 8

इस प्रकार महेन्द्र पर्वत पर निवास करते हुए महीपतिवर्मन के महाशक्तिशाली पुत्र जयवर्मन उत्पन्न हुए । सूर्य के समान तेजस्वी जयवर्मन के चरणों की वन्दना राजागण और देवतागण भी करते थे ।। 9

महाराज श्रीजयवर्मन जन्म से जयवर्द्धन नाम के थे, परन्तु राज्यारोहण होने पर जयवर्मन कहे गये, जिनके चरणों पर बड़े-बड़े राजा अपना मस्तक रखते थे ।। 10

उन अधिराज महाराज जयवर्मन की नानी का सबसे छोटा पुत्र श्री रुद्रवर्मन नाम के थे जो युद्धभूमि में घोर पराक्रमी योद्धा थे तथा जो भगवान् रुद्र के अनन्य भक्त तथा शुद्ध धर्माचरणवाले थे ।। 11

उनकी बहिन का पुत्र (भगिना) गुणरूपी रत्नों से भरे रत्नसागर के मान, व्युत्पन्न मतिवाले तथा सम्पूर्ण पृथिवी का दोहन करनेवाले महाराज पृथु के समान महान् पराक्रमी एवं राजाओं से वन्दित महाराज पृथिवीन्द्रवर्मन थे ।। 12

राजकुलरूपी आकाश में चन्द्रलेखा के समान श्रीरुद्रवर्मन की पुत्री थी । उनकी सती रानी नृपतीन्द्रवर्मन की बेटी की देवाङ्गनाओं के समान सुन्दरी पुत्री थी । 13

इन दोनों राजा-रानियों से उत्पन्न राजकुमार, जो शत्रुरूपी हाथियों के संहारक सिंह के समान था तथा भगवान् नृसिंह के समान तेजस्वी एवं सभी दिशाओं में अखण्ड कीर्ति फैलानेवाला था, जिसका नाम श्रीइन्द्रवर्मन था ।। 14

इन्हीं श्रीइन्द्रवर्मन ने पत्थरों से निर्मित मन्दिर में श्रीन्देश्वर नामक शिवलिंग की स्थापना की थी । महाराज श्रीइन्द्रवर्मन एवं महारानी ने समान भक्तिभाव से भगवान् शिव की आराधना की तथा श्रीन्द्र तालाब खुदवायी और

आश्रम बनवाये ।। 15

उन्हीं महाराज श्रीइन्द्रवर्मन, जिनके निर्बाध यश-विस्तार से दिशाओं का तेज एकराशि हुआ था, उन्होंने अपनी पटरानी से जो राजपुत्री थी, सभी बन्धनों से मुक्त प्रथित यशवाली पर्वतराजपुत्री पार्वतीपुत्र असुरपुर-विनाशक कार्तिकेय के समान श्री यशोवर्मन नामक पुत्र उत्पन्न किया जो शक्तिशाली शत्रुओंका भी विनाशक हुआ ।। 16

दूसरे स्थानों के उन्नत मस्तकवाले बड़े वृद्ध राजागण और अधिक उन्नत होने की इच्छा से उनके चरणकमल में नत हो रहे थे ।। 17

गम्भीर आह्लादकारक रूपवान् होते हुए भी जिसके प्रतापाग्नि का विस्तार क्षीरसागरपर्यंत हो रहा था, वह लोगों के लिए असह्य हो रहा था ।। 18

जिसकी कीर्ति अपने विस्तार से उद्धत हो रही थी, उसे आच्छादित अब आगे विस्तार से रोकने के लिए ही मानो जिसने अपने गुणों का उससे भी अधिक विस्तार किया जिससे उसकी कीर्ति के विस्तार से टकराकर पुराने पड़े ब्रह्माण्ड के और खण्ड न हो जायें ।। 19

जो गाम्भीर्य में दूसरा समुद्र ही है; बल में वायु है; धैर्य और दृढ़ता में हिमालय और शक्ति में विष्णु के समान है, उसका रूप ऐसा कि मानो अभी कामदहन हुआ ही नहीं अर्थात् अदग्ध कामदेव के समान उसका रूप है ।। 20

जिसकी शक्ति से आकर्षित हुई राजलक्ष्मी राजाओं की मण्डली का त्यागकर उससे आ जुड़ी थी तथा दिग्गजों के मद के गंध से मस्त रहनेवाले भौंरे उसकी माता को पाकर अब उस गंध की इच्छा ही नहीं करते ।। 21

लक्ष्मीपति भगवान् विष्णु के समान पराक्रमी वह राज्यलक्ष्मी को प्राप्त कर पृथिवी के देवताओं से भरकर (अर्थात् सर्वत्र देवताओं की स्थापना कर) पृथिवी को ही देवनगरी अमरावती बना दिया ।। 22

जिसके प्रताप से तृप्त सारे लोक से रही उष्मा निकल रही थी, वह उष्मा पृथिवी की सभी दिशाओं में स्थापित दिग्पर्वतों, वनों और समुद्रों को लाँघ गयी थी ।। 23

प्राचीन काल में भगवान् नारायण ने अमृत पाने की लालसा से मोहिनी नाम से स्त्री-रूप लिया था, वे अब जिसके रूप का अमृत देखकर पुरुष-रूप में आना ही नहीं चाहते थे ।। 24

जो पूर्ण भी था, अदम्य भी था, गम्भीर भी था और महनीय भी था, उसके रथ के चक्के का घूमना, शत्रुसागर में चक्रवात हुआ था ।। 25

संयमी होने के कारण जो अपनी शक्ति को गुप्त रखता था, परन्तु जिसने अपने कृत्यों में शक्ति का प्रयास किया, तपस्वियों में जो नारायण के समान था तथा वह गुहावासियों में नरसिंह के समान था ।। 26

युद्ध में जिसने श्रेष्ठ राजाओं के रत्नखचित सिरों को काटकर ऐसा ढेर किया मानो जयलक्ष्मी के साथ रतिक्रीड़ा के लिए क्रीड़ा पर्वत बनाया हो ।। 27

जिसके दोनों पैर युद्ध के रक्त में धुले हुए थे, वे धृष्ट राजाओं के मस्तकों की मुकुटमणि की आभा से मधु-धारा से अभिषिक्त चरण होने का भ्रम उत्पन्न कर रहे थे ।। 28

जिसके सीने लगी चंचला लक्ष्मी भी अचंचल हो गई थी तथा मुख में स्थित सरस्वती उसके मुख से विनय पाठ की तरह हो रही थी ।। 29

नियमों (विधि) के पालन में जो कठोर और टेढ़ा था तथा जो तेज और न्याय के भय के कारण सर्वात्म पदधारी बना था ।। 30

जिसके गाम्भीर्य से समुद्र को कम गहरा समझकर जिसके शत्रु समुद्र में जाकर डूब गये ।। 31

राष्ट्र में तथा देश में प्रतापाग्नि से जलकर शत्रु बीज गर्भ में ही समाप्त हो गये तथा श्रद्धारूपी जल सिंचित होकर धर्मबीज विकसित हो गया ।। 32

जिसकी सुन्दरता की उपमेयता कामदेव का सौन्दर्य न पा सका क्योंकि इसकी सुन्दरता शिव के तीसरे नेत्र की आग से कीट-पतंग की तरह जलकर भस्म न हुई ।। 33

होम और योग-साधना में निरत तथा वेदाध्ययन में आसक्त वह प्रजापति ब्रह्मा के सदृश होते हुए भी शत्रुओं के लिए अचल अडिग या पर्वत हुआ ।। 34

युद्ध में तलवार की सहायता से जिसने दो व्यवहार का समान रूप से प्रदर्शन किया– उद्धत शत्रुओं को खण्ड (टुकड़े-टुकड़े) कर दिया था तथा अपने यश को अखण्ड बना दिया ।। 35

जिसने प्रजा के पालन या अनुशासन में धर्ममार्ग का अनुसरण किया तथा जो योगेश्वर शिव की भक्ति परायण था तथा शत्रु राजे जिसके चरणों की वन्दना करते थे, वह दूसरा मनु के समान हुआ ।। 36

शत्रुगृह में प्रकाशित जिसकी शक्तिरूपी चन्द्रमा मेघ मण्डल से बाहर निकले अमृत से धुला हुआ था, परन्तु उसमें शत्रुओं के घरों से निकले दुःखभरे दिनों के कारण निकलते हुए वाष्प (आह) से लांछन (काला घटवा) बन रहा था ।। 37

इसके द्वारा प्रेरित राजाओं ने मुझे बहुत पीड़ित किया, जिस वीर का आलम्बन पाकर राजधर्म मज़बूत होते हुए भी कलि का नाश किया ।। 38

जो विपत्ति में भी सभी कामनाओं को प्रदान करनेवाली सद्वृत्तिरूपी गाय को अर्थात् प्रजाजनों को सम्पत्ति प्रदान करनेवाली सद्वृत्तिरूपी गाय को जिसने विपत्ति में भी वैसे ही नहीं छोड़ा, जैसे विपत्ति के समय भी महाराज दिलीप ने नन्दिनी को नहीं छोड़ा ।। 39

जिसके असंख्य यज्ञों के धूम्रजाल तरंग को देखकर सौ यज्ञ करनेवाले इन्द्र को अपने पद के छिन जाने का भय हुआ ।। 40

जिसने प्रजाजनों को अपने मन से क्षणभर के लिए भी वैसे ही बाहर नहीं किया जैसे कलिकाल में भक्तिपंथ में आसक्त मनवालों का मन विनय को छोड़ पाता था ।। 41

जिस दिग्गज की सम्पदा त्याग से ही बढ़ गयी, उस दिग्गज के मदगंध से आकर्षित भौंरे कमलामोद को त्यागकर उसके मद पर आ जुटे थे ।। 42

अपने शरीर सौन्दर्य गुण से जिसने जगत के चित्त को चुरा लिया मानो पराजित कामदेव के आत्मसमर्पण के बाद उसका आश्रय लिया हो ।। 43

प्रत्युपकार की इच्छा को भुलाकर जो जगत् के उपकार में लगा था

क्योंकि (विकास की आकांक्षा रखने वाले कमल कब सूर्य को छोड़ देते हैं) सूर्य बिना किसी इच्छा के कमलों को विकसित करना कब छोड़ देता है ।। 44

याचकों द्वारा याचना की गई वस्तु के साथ अर्थ (धन) दान के द्वारा जो देवलोक का कल्पवृक्ष पृथिवी पर ही बनकर दिखा दिया ।। 45

चारों ही आश्रमों की मर्यादा की रक्षा अपने शासन में बनाये रखते हुए भी जिसने बड़े-बड़े आश्रमों का सभी दिशाओं में निर्माण करवाकर आश्रमों को सौ संख्यावाला बना दिया। ।। 46

एक बार राम ने कश्यप ब्राह्मण को सारी पृथिवी दे दी तब नित्य पृथिवी जीतने की इच्छा की पूर्ति के लिये जिसने हिमालय पर्वत दिखा दिया ।। 47

बुद्धि, धैर्य, उत्तम सद्‌गुणों भद्रता, करूणार्द्रता आदि देखकर दूसरा कोई दुर्भाग्य अब न आ जाये इसलिए उसकी स्त्रियों ने उसकी उपासना की ।। 48

सुश्रुत के कथनानुसार सदाचरण के द्वारा ही एक अकेला वैद्य होते हुए भी सभी प्रजाओं के रोग को जिसने हरण कर लिया ।। 49

स्वच्छ सोने के समान चमकदार कोमल सुन्दर वर्ण तथा गुरु बृहस्पति के सामन धारण किये हुए था उसने अनेक राजरत्नों भरी धरतीरूपी गाय को भी धारण किया ।। 50

जो सभी शास्त्रों में, शिल्प, भाषा, लिपि, नृत्य, गीत आदि में तथा विज्ञान आदि शास्त्रों में आदि कर्त्ता ब्रह्मा के समान पण्डित था ।। 51

जिसके दायें, बायें दोनों हाथों से धनुष से छोड़े बाणों ने जयलक्ष्मी का हरण किया तथा जो स्वयं अपने को बाण के आघात से बचा रहा था वही उत्तम स्त्रियों के काम बाण से स्त्रियों के वश में हो गया था ।। 52

जिसके तीक्ष्ण तलवार का एक ही प्रहार ने महान लौह दण्ड को तीन टुकड़ों में तथा शत्रुओं की प्रतिष्ठा को दूर से ही सैकड़ों टुकड़ों में काट दिया ।। 53

भूलोक को अपने यश विस्तार से अति पूर्ण देखकर अर्थात् अब आगे यश-विस्तार के लिए भूलोक में जगह न देखकर ही अपने यश-विस्तार को पाताल लोक तक ले जाने के उद्देश्य से ही मानो उसने यशोधर तालाब के लिए

बहुत गहरी खुदाई करवाई ।। 54

जो चक्र यन्त्र के रन्ध्र से लक्ष्य बेधकर रण में न केवल अर्जुन की कीर्ति से ही अलंकृत हुआ अपितु अति बल पराक्रम के प्रदर्शन से भीम भी हुआ ।।55

जिसने चीन की सीमा से लेकर दोनों समुद्रों तक की सीमा से बँधी पृथिवी का पालन किया परन्तु उसके गुणों की पंक्ति के समान ही उसकी कृति भी उसकी विद्या और संपदा के समान असीम हुयी थी ।। 56

जिसके गुणों का हरण कर बनी शिव स्तुति तत्त्वोक्ति बन गई जो सुमेरु पर्वत तक स्पर्श कर गया जो देखने में सुमेरु स्वर्ण वर्ण के समान ही था ।। 57

उन्हीं यश और धर्म से सुशोभित महाराज श्री यशोवर्मा के द्वारा जो राजाओं में चन्द्रमा के समान न केवल इसलिए थे कि उनका मुख चन्द्रमा के समान था अपितु चन्द्रमा के समान एक अकेला सम्पूर्ण पृथिवी का भोग करनेवाला एकच्छत्र सम्राट् होने के कारण था ।। 58

उसी एकच्छत्र सम्राट् श्री यशोवर्मा द्वारा गुरुजनों की पुण्यवृद्धि के लिए अपनी शिल्पकला द्वारा रची शिव और पार्वती की पृथुल बड़ी (चार या चतुष्कोण) मूर्ति साथ-साथ स्थापित किये गये ।। 59

उन्हीं के द्वारा विचित्र रत्नों से रचित आभूषण, स्वर्ण निर्मित वस्त्र और सोने का कमल पत्र धारण कराये गये ।। 60

अनेक पालकी, पंखे, मयूरछत्र तथा सोना-चाँदी के बहुत-से पूजा पात्र ।। 61

तथा अपने द्वारा बनवाये गये गहरा और आह्लादकारी शोभायुक्त तालाब जो मृगलांछन हीन (निष्कलंक) चन्द्रमा के प्रतिबिम्ब के समान या जिसे कारीगरों ने चतुष्कोण बनाया था ।। 62

नृत्य-गीतादि में दक्ष पुरुष, श्रेष्ठ नारियाँ और कर देनेवाला सम्पूर्ण गाँव, गोचर भूमि और बागीचों सहित ।। 63

ये सब राजाधिराज के द्वारा जिसके तेज से जगत प्रज्वलित हो रहा था उसने ही शिवजी की स्थापना के दिन में प्रदान किया ।। 64

श्रीन्द्रेश्वर आदि देवों के लिए शिव सेवक भी दान किये जो जगत् के पालन करनेवाले राजाधिराजों इन्हें अपनी सेवा में नहीं लगाने योग्य हैं ।। 65

यदि राष्ट्र पर शत्रु संकट आ जाये तब ही शत्रु विनाश के काम में इन्हें लगाया जाय अन्यथा कभी नहीं ।। 66

इस देव-मन्दिर के प्रांगण में राजा और राजकुमार अलंकृत वेशभूषा में प्रवेश दोषरहित होगा । इसी द्वार से महान् होते हुए भी राजागण प्रवेश करें । ब्राह्मण, संन्यासी, मंत्री, सेनापति– सब शिष्ट रूप में प्रवेश करें ।। 67

ब्राह्मण आदि तथा सामान्यजन अलंकृत वेशभूषा में न आवें । कान में स्वर्णाभूषण तथा अन्य गहने पहनकर नारियाँ न आवें ।। 68

नीले रंग का वस्त्र न पहने न झगड़ा करें । अन्दर जाकर न खायें और न शस्त्र लेकर जाय ।। 70

किसी की अवमानना न करें न मनुष्य को खींचकर हटावें (मनुष्यों को पकड़े नहीं) शिव-मन्दिर के प्रांगण में इस प्रकार के काम न किये जाय ।। 71

शिव-मन्दिर के द्वार के सामने आश्रम के अन्त तक जाते हुए लोग दूसरों द्वारा आच्छादित छत्र के साथ न चलें और सवारी से उतरकर ही चलें ।। 72

जो सज्जन पूजा करने की इच्छा से स्त्री-पुरुष यथाशक्ति पूजा-सामग्री के साथ भक्तिपूर्वक प्रवेश करें ।। 73

शिष्ट लोग धनहीन भी हों तो श्रद्धा-भक्तिरूप उनका महाधन है केवल पुष्प के साथ ही प्रवेश करें क्योंकि शिवजी को भक्ति ही परम प्रिय है ।। 74

कटे अंगवाले, चिह्नित अंगवाले, कृतघ्न, कुबड़ा, बौना और जो महापापी हों, हीनदेश के वासी हों, के अतिरिक्त ।। 75

जो कुष्ठादि महाव्याधि से ग्रसित शरीरवाले घृणास्पद आदि सभी लोगों का कभी भी इस शिव-मन्दिर के प्रांगण में प्रवेश न करें ।। 76

जिनका चित्त भगवान् शिव में लगा हो, संयमी हों, आत्मजयी हो, शान्त चित्तवाले हों, जो दोनों कुलों से पवित्र हों, वे ही भगवान् शिव की पूजा करने योग्य हैं ।। 77

जो ब्राह्मण इस आज्ञा का अहंकारवश उल्लंघन करे, वे मृत्युदण्ड के भागी होते हुए भी उनका वध न किया जाय अपितु उनका धन छीनकर देश से बाहर कर दें (इस आंगन से बाहर निकाल दें) ।। 78

राजपुत्र आदि इस शासनादेश के उल्लंघन के अपराधी हों तो बीस पल सोना दण्ड के रूप में लिया जाय । राजपरिवार के अन्य लोग, बन्धु-बान्धवों तथा मंत्रियों को इसका आधा दण्ड हो ।। 79

इससे आधा दण्ड उन्हें जो छत्र धारण करनेवाले क्षत्रिय राजाओं तथा व्यापारी प्रमुखों को उसका आधा दण्ड दिया जाय ।। 80

शैवों और वैष्णवों को उसका भी आधा दण्ड दिया जाय तथा उसका भी आधा दण्ड सामान्य जनों को दिया जाय ।। 81

इस शासनादेश के अनुसार जो सामान्यजन दण्ड की राशि भरने में असमर्थ हों, उनकी पीठ पर सौ बेंत मारा जाय ।। 82

पूजा, पूजा के उपकरण या पूजा काल का तथा शुद्धि तथा दान-वस्तु में से यदि किसी एक का भी क्षय हो तो कुलपति, अध्यक्ष तथा अन्य भी दोषी होंगे । इन्हें क्रमोत्तर रूप में बीस पल सोने से लेकर एक पल सोने तक का दण्ड (जुर्माना) किया जाय ।। 83-84

जिस अपराध में कुलपति आदि की संलिप्तता न हो तो केवल अपराधी को ही यथायोग्य धन दण्ड हो अथवा देश-काल के अनुसार दण्ड दिया जाय ।। 85

पूजा के निर्धारित काल का यदि उल्लंघन हो जाता है तो पुरोहित को बीस पल चाँदी तथा पुजारी को दस पल चाँदी का दण्ड किया जाय ।। 86

यदि द्वाराध्यक्ष या लेखक अपने कर्त्तव्य की उपेक्षा करते हैं तो पाँच पल चाँदी का दण्ड दिया जाय तथा छोटे कर्मचारियों को तीन पल चाँदी का दण्ड दिया जाय ।। 87

रसोइया, रसोई का अध्यक्ष तथा अन्य रसोइये आँगनाध्यक्ष के कार्यच्युति पर तीन पल चाँदी का दण्ड हो ।। 88

सुवर्ण या रजत देने में असमर्थ हों तो दूसरे द्रव्य का भी दण्ड दिया जाये । इन सब नियमों का पालन तपस्वियों द्वारा करें ।। 89

श्रीयशोवर्मन भविष्य के कम्बुज के नरेशों से यह याचना करते हैं कि इस शिवधाम की एवं धर्म और दान की गई सम्पत्ति की रक्षा करें ।। 90

ब्रह्माजी द्वारा बनाए गए राजाओं पर यह भार दिया जा रहा है कि पालन करने के योग्य का पालन किया जाए तथा दण्ड देने योग्य को दण्ड दें ।। 91

शिवजी के धन का हरण करनेवाले राजा अपराधी माने जायें तथा वे दुर्गति को प्राप्त हों । इनकी रक्षा करनेवाले तथा इन रक्षकों की रक्षा करनेवाले राजा परम पद को प्राप्त होंगे ।। 92

कमलोद्भूत ब्रह्माजी के प्रताप से कम्बुज के राजा ने इन नियमों का विधान किया तथा अम्बुजाक्ष ने इस शिलापट्ट को कम्बुज-लिपि में लिख दिया ।। 93

41

पूर्वी बारे अभिलेख
Eastern Baray Inscription

उठे हुए किनारे जो एक आयताकार रूप से पूरब से पश्चिम 3 मील तथा उत्तर से दक्षिण 2 मील तक है, के साथ एक बड़े तालाब की सूखी तलहटी को पूर्वी बारे कहा जाता है। ऐसा विश्वास किया जाता है कि इस तालाब की खुदाई राजा यशोवर्मन द्वारा की गई है जिसे 'यशोधर तटाक' कहा जाता था। अंगकोर के पूरब में यह स्थित है। आयत के चारों कोने पर खड़े पत्थर पाये गये हैं। एक पत्थर पर एक तरह का शिलालेख और बाकी तीन पत्थरों पर दूसरे शिलालेख पाये जाते हैं। सभी शिलालेख उत्तरी भारतीय लिपि में लिखे गये हैं। लोले-अभिलेख के समान ही ईश्वर की वन्दना तथा राजा की वंशावली इस अभिलेख में है।

इस अभिलेख से निम्नांकित तथ्यों की ओर संकेत मिलता है–

1. राजा ने समुद्री यात्रा प्रारम्भ की थी।

2. उन्होंने महाभाष्य पर अपनी आलोचनाएँ लिखी थीं ।

3. इस अभिलेख से हमें यह जानकारी मिलती है कि कामसूत्र के लेखक वात्स्यायन थे ।

4. गुणाढ्य की पौराणिक कथा का वर्णन मिलता है ।

बार्थ ने इस अभिलेख का सम्पादन किया था ।[1]

VV 1.2 same as VV 1.2 in No. 61 of RCM

संसर्पिपाटलतलाङ्शुतरङ्गिताशङ्कङ्काङ्घ्रिपङ्कजयुगं भुवनं पुनातु ।
रुद्रार्द्धचन्द्रपटु कोटि निपात वेग वेद्यक्षरटक्षतज पुञ्जमिवाधुनापि ॥ 3

VV 4 - 18 same as VV 3 - 17 in No. 61 of RCM

ईदृश्यहं स्मरकृतङ्किल साधनन्ते यत् सत्यमात्मनिधनायतु साधिताहम् ।
सामर्षमित्य गजयाभिहितो नु भूयाः कामं व्यद्यादधिककान्त(त)मंयमीशः ॥ 19
यस्योरुकान्तेर्न्नव यौवनस्य कृष्टा चिरञ्जारुपराक्रमेण ।
समृद्धकामावनिमण्डलश्रीरुत्का नवा स्त्रीव सुसंमुखीना ॥ 20
प्रताप पुष्पायुद्यतप्तमुष्णं यस्योरसि स्वं स्तनमाजिलक्ष्मीः ।
अमज्जयद् गाढ़मुढ़स्त्रपातात् किणाङ्कभीत्येव रणाङ्गनेषु ॥ 21
नीलापि यस्यासिलता करस्था रणेऽरिरक्तारुणिताशु भूयः ।
विलीनपूर्व्वोत्थितधूमजाला ज्वालेवतेजोज्वलनस्य रेजे ॥ 22
यथा यथा यश् शितशस्त्रविद्धस्तथा तथा दीप्तनरोऽरिचक्रे ।
शस्त्राग्रमात्राल्लिखितोपि भानुस्तव्याज दीप्तिं श्वशुरस्य चक्रे ॥ 23
हृत्वाजितप्तो नृपमस्त्रपाणिं योऽयो जयाच्चामर चारणाय ।
हरेस्तु सज्जेऽपि पदापगन्धे प्रयोग जाऽचङ्गजकर्ण्णवायौ ॥ 24
अन्योन्यसंघहनहेतुकष्टे प्रादाद् विरामञ्जय एवयस्य ।
शास्त्रस्य श श्वत् षरिशोधितार्थो भ्रान्तिङ्गते मन्त्र इवाजिमूर्द्नि ॥ 25
जितेऽकरोदक्षतपक्ष एव शौर्य्यादशङ्कस् सदयो दयांयः ।
पक्षापहारादचले चलेपि पुनः पुनर्मुञ्चति बज्रमिन्द्रः ॥ 26
सहस्रदृष्टिः परिपूर्ण्णवत्सस् सहस्रभोगस् सुनिरस्तरन्ध्रः ।

---

1. *ISC*, p.432

श्रीमहेन्द्रारिमथनस् स्यालैर्भूपमचायत ॥ 22
.........ग्राहक निक्षेप स्नाणं(?) सीमास्त पूर्व्वतः ।
कृता गाढ़ नदी याम्ये........पश्चिमेऽभवत् ॥ 23
सिद्धकाध्वाभवत्सोप्य वधिरुत्तरतः कृतः ।
.......त्वा धनानि ते तासु भूषु ग्रामान् प्रयक्रिरे ॥ 24
स्थापितेऽष्वाविलग्रामे..............न्देषु पञ्चसु ।
प्रत्येकं षोड़शप्रस्थधृतान्येवार्प्पितानि.......... ॥ 25
श्वेताक्षतञ्च गणितं पञ्चरवरिकया कृतम् ।
कल्पितं प्रतिवर्षं तद्भक्त्या भद्रेश्वरेश्वरे ॥ 26
..........रूपछन्मङ्गलै.............. ।
.............श्रीयशोवर्म्मनामधृक्......... ॥ 27
...................................तः ।
देवी पूर्व्वापदा सा तु..............॥ 28
......................प्रिया तस्यालं.......मनस्विनः ।
.................................निर्म्मितम् ॥ 29
बलाध्यक्षस् सालंनामा स्थलीग्रामे चबुद्धिमान् ।
(बाणविध्वष्टमिश्) शैवं लिङ्गंभवमतिष्ठिपत् ॥ 30

अर्थ–

कामदेव के जीतनेवाले शिव को नमस्कार। ताँबे के समान लाल तीसरी आँख की आग की ज्योति से ।। 1

था........कुल में उत्पन्न थी। पिंख ग्रामवाली ।। 2

उसके बेटे ख्याव...........। ज्येष्ठ प्रणव शर्व.....आष्टयी ।। 3

कृष्ण पाल की कहा (धाय)। केशव भट्ट की भवानी पार्वती कुलभा(वनी) ।। 4

..........शोभनेवाले का।...........वे हुए ऐश्वर्य के लिए........।। 5

कम्बुज लक्ष्मी नाम की.........प्राग नाम की........प्राण...........।। 6

ह्यङ् चन्द्रा नाम की हुई पतिव्रता प(त्नी उसकी)।

...........सम्पत्ति को आगे अन्त उद्धार करता हुआ ।। 7

.........प्रभावती नाम की एक बेटी को जन्म दिया। उससे केशव भट्ट नामक से ....जानता है वह ।। 8

आनम्र राजाओं के मस्तक पर माला के समान शासन करनेवाला राजा श्री जयवर्मन नामक हुआ जो विनय रूपी लक्ष्मी से शोभित प्रकाशवाला था ।। 9

जो चतुर्भुज विष्णु द्वारा अचल पृथिवी को धारण करनेवाला दूसरे चतुर्भुज विष्णु के समान था। चार विद्याओं का पढ़नेवाला चतुर्मुख ब्रह्मा के समान शोभित था ।। 10

कृष्णपाल जो महेन्द्र का शत्रु था उसका मथनेवाला नाम पाया था केशवभट्ट नाम का राज्य पुरोहित वह था ।। 11

ओंकार के साथ शिव को धारण करता हुआ नृपेन्द्र के पराक्रम को नाम भोग पुत्र को प्राप्त करनेवाला पञ्चावर्णों में अधिकता को प्राप्त हुआ था ।। 12

शिव की आत्मावाला 'शयन स्थान' मन्दिर का श्रेष्ठ अधिपति राजा से निवेदन करके भाई सहित सन्तति के पुर को पाला था ।। 13

पूर्व में पिं स्वम् पृथिवी की सीमा त्रिकष्ट अमर पृथिवी हुई दक्षिण में

त्रैलोक्यनाथ पश्चिम में कन्या क्रमशः था ।। 14

.......स्ता........उत्तर सीमा थी, वहाँ श्रीधर विष्णु की पूजा होती थी । राजा द्वारा दिये गये दास आदि ने पुनः उसे बढ़ाया था ।। 15

वन नेत्र पृथिवी की सीमा पूर्व से यह कं ति पृथिवी थी.......दक्षिण से शर क्रम पश्चिम में स्तुग्व नदी थी ।। 16

उत्तर में ध्रुव सीमा थी, भूमि की अवधि सीमा तारा थी । पूर्व में स्वयम्भू, दक्षिण में जय......।। 17

हतिवन और सिन्धु सीमा पश्चिम हुई । वे ग्रिङ् सीमा उत्तर से थी जो गोलक से चिह्नित नजदीक में थी ।। 18

अकृत्रिम स्थल, क्षोणी पृथिवी को, राजा को वे प्रणाम कर जैसे बहुत काल में ...मान्तां..सीमान्त पृथिवी को यहाँ नापकर, ग्राम को........।। 19

पूर्व से व्येक नदी की सीमा उसकी दक्षिणी सीमा पार्तवोङ् पश्चिम में ब्लेङ्वोच नदी उत्तर से सीमा हुई..........।। 20

वहाँ उनने शिवलिंग की स्थापना की थी और महिषासुरमर्दिनी भगवती की मूर्ति स्थापना की थी विधिपूर्वक समुद्र और पर्वतों से युक्त स्थल पर स्थापना की गयी ।। 21

आविलक्ष्मी को उसने सन्तुष्ट करके वेदप्रिय राजा को सन्तुष्ट करके श्री महेन्द्र शत्रु के मथनेवाले राजा ने श्यालों से राजा की थी ।। 22

.........ग्राहक निक्षेप स्नान सीमा का अस्त पूर्व से, दक्षिण में गाढ़ नदी सीमा की........पश्चिम में हुई ।। 23

सिद्धक रास्ता हुआ वह भी सीमा उत्तर से की गयी । .....त्वा, धनों को उनने उन भूमि में ग्राम से प्रकृष्ट रूप से सीमा की गयी ।। 24

अविल ग्राम में स्थापितों में..........न्देषु.....पाँचों में प्रत्येक को सोलह प्रस्थ घी अर्पित हुए ।। 25

गिने हुए उजले अक्षत- न टूटे हुए चावल, पाँच खारी अर्पित किये गये । उन देवी-देवताओं की भक्ति से भद्रेश्वर के ईश्वर के विषय में अर्पित हुए ।। 26

..........रूप के हरण करनेवाले.......मंगलों से......श्री यशोवर्मन नामधारी........।। 27

...........त- से............देवी जिनने पहले आपत्ति डाली थी वे.....।। 28

मनस्वी........................निर्मित हुआ ।। 29

साल नाम का सैनिकों का अध्यक्ष स्थली ग्राम में और बुद्धिमान वाम गति से ८१५ शाके में शिवलिंग............नया स्थापित किया गया ।। 30

50

नोम प्रह विहार के खड़े पत्थर का अभिलेख

Phnom Prah Vihar Stele Inscription

यह स्थान म्लू प्री प्रान्त में डांगरेक पर्वत की चोटियों में से एक पर बसा हुआ है । यह अभिलेख उत्तरी भारतीय लिपि में है तथा कम्बोडिया में इसके प्रयोग का अन्तिम उदाहरण प्रस्तुत करता है । इसमें उस परिवार की चर्चा है (माना जाता है कि उस परिवार का कुछ सम्बन्ध जयवर्मन द्वितीय से है) जो भिन्न-भिन्न राजाओं से धार्मिक कार्यों के लिए धार्मिक उपकरण या दान प्राप्त करते थे । वंश-परम्परा केशव भट्ट तथा उनकी लड़की प्रभावती से शुरू होती है । कम्बुज लक्ष्मी जिसे प्राणा भी कहा जाता है इस परिवार का एक सदस्य था । यह परिवार दो शताब्दियों तक चर्चा में रहा ।

इस अभिलेख में कुल 51 पद्य हैं ।

बार्थ ने इस अभिलेख का सम्पादन किया है ।[1]

VV. 1-4 are identical with VV. 7-10 of RCM No. 71

तस्य कम्बुजलक्ष्मीस् सा प्राणाख्याप्यनुजा सती ।
देवी बभूव धरणीश्रियौ लक्ष्मीपतेरिव ॥ 5
योऽसौ विष्णु वलाख्योपि लक्ष्मीन्द्राख्यामवाप्तवान् ।
एकवित्ताधिपत्ये स युयुजे जयवर्म्मणा ॥ 6
नासाख्यस्तस्य भृत्योऽभूद्भूक्त्या विश्वस्त सन्मतिः ।
धृति रत्नाकरो धीरो भद्रो भद्र इवापरः ॥ 7
ततश् श्रीनृपेन्द्रादिविजयाख्यामवाप्तवान् ।
(योन) रपश्रीहरणे वीरोऽभूद वाहिनीपतिः ॥ 8
अपूर्व्वां पृथिवीमध्यां नरेन्द्रदान्ता(ं) महीयसीम् ।
आख्यायमार्य्यास्य जघतो ह्यङ्चन्द्राख्या प्रियाभवत् ॥ 9
पवित्राख्या च सा पत्नी विन्द्रुर्द्धस्य महाधियः ।
प्रभावती प्रिया हृघा हृषीकेशद्विजन्मनः ॥ 10

VV. 11-14 are identical with VV. 11-14 of RCM No. 71
VV. 15-16 are identical with VV. 25-26 of RCM No. 71

महारथारुणस्य क्ष्मांवनाख्यां वैष्णवीयुताम् ।
शून्यां सशिवलिङ्गा प्रागापुस्ते भूपशासनात् ॥ 17
चेतना पुरकं पूर्व्वे दक्षिणे मूषिक स्थला ।
लापङ् पश्चिमतस्तस्या ला(ं)पङ् सीमोत्तरे भुवः ॥ 18
देव्या प्राणाख्याया भ्रामा लक्ष्मीन्द्राख्येन तौ सुरौ ।
दत्तदासादिपूजाभिर्य्यत्नादुन्मीलितौ पुनः ॥ 19
भवालयभुवं मान्यन्ते पुरस्कृत्य शासनम् ।
भूभुनो वल्लभा भक्त्या तेमिरे धर्म्मबुद्धयः ॥ 20
नदी पूर्व्वेऽवधिस्तस्या याम्ये राजेश्वरस्तथा ।
पश्चिमेऽभूद्भवपुरं सौम्ये देवातिदवेकः ॥ 21
देवी कम्बुजलक्ष्मीस् सा साध्वी स्त्री धर्म्मवर्त्तिनी ।

1. *ISC*, p. 525

श्रीधर्म्मवर्धनं पुत्र सुषुवे धर्म्मवर्धनम् ॥ 22
ह्यङ्चन्द्राख्या स्म सा सूतेः परमार्थशिवात्मजम् ।
सरुद्राणीमुमां सामवेदं पोड्इति चात्मजम् ॥ 23
प्रभावतीति सा सोमसोम्माकृति रति प्रभा ।
अध्यापकाख्यं सुषुवे सुतं शास्त्रविदां वरम् ॥ 24

....

....त्रिपुरद्विषः ॥ 25
......................शक्त्या शक्तिभृतां वरम् ।
................असूत देव्युमाख्याप्युमासमा ॥ 26
..............या पोङ्सा लक्ष्मीरिव वपुश्श्रिया ।
पुरुषोत्तमस्य पत्नी भूपबन्धोर्म्महात्मनः ॥ 27
दधदध्यापकाख्यस् स नाम राजेन्द्रपण्डितम् ।
रुद्राश्रमे भूमिभुजा नियुक्तोऽध्यापकः कृती ॥ 28
परमार्थशिवो भूयो वल्लभस्तस्य भूपतेः ।
पृथिवीन्द्रोपकल्पाख्यां श्रीमतीं प्रथितामधात् ॥ 29
सा पोङ्असूत गोविन्दं माधवीं कमलामिव ।
सुताञ्च भान् इत्यपरां पुरुषोत्तमतस्........ ॥ 30
राम मह प्रिया सूत माधवी शिवशक्ति(तः) ।
पञ इत्याख्याम् अव् इत्याख्याञ्चानाख्याङ् गरुड़न्त(था) ॥ 31
भान् इत्याख्या अव् साध्वी विदुषोऽभूद्वि(भावसोः) ।
नाम्नाविभावसोस् साक्षान्मूर्त्तस्येव वि(भावसोः) ॥ 32
राजेन्द्रपण्डिताख्यस् स लेभे भूपात् षदीभु(वम्) ।
राजहोत्रा शिखाशान्तिनाम्ना स्यालेन स(ं)युतः ॥ 33
पूर्व्वे तटाकपादोऽस्या भूमेस् सीमास्ति दक्षि(णे) ।
कुटीतटाक कश् शक्तदेवक्ष्मा पश्चिमेऽवधिः ॥ 34
उत्तरे गंधसारक्ष्मा ताभ्यां तस्यां कृतं पु(नः) ।
स्थापित ज्यामवत्स्वर्णलिङ्गन् त्रिव्योम मूर्त्तिभि(ः) ॥ 35
राजेन्द्र पण्डित सुतो नागपालोऽतिकोविदः ।
भागिनेयश् शिखाशान्तुश् चंकाक्ष्मामाप भूपतेः ॥ 36

प्राच्यां सुरधृटन्तस्यास् समोङ् सीमास्ति दक्षिणे ।
पश्चिमे लोहकारक्ष्मा नगरीमार्ग्ग उत्तरे ॥ 37
टण 38 पे पससपहपइसमण
..........स............सून्नष्ट महात्मनः ।
हतति(मिरोणा) शीति ब्रह्मविव्रभवज्ञक(:) ॥ 39
सावित्री पञ्चगव्याख्या ब्रौनाम्नी माधवी तथा ।
तेषान्धर्म्म प्रवृत्तीनान्द्यम्र्म्यास् सन्ततयोऽभवन् ॥ 40
बलाध्यक्षस् सालं नामा स्थलीग्रामे चबुद्धिमान् ।
वाणविध्वष्टामिश् शैवं लिङ्ग भवमतिष्ठिपत् ॥ 41
शिवशक्तिस् स(च) आचार्य्यश् शिवशक्तिविभागवित् ।
शिवशक्त्येक वस्(ति) श् शैवा (चा)र्य्याधिपोऽभवत् ॥ 42
नीर(ज)श्चेत(स्)ा यस्य नीरजासन सन्मतेः ।
नीरजस्येव पादस्य नीरजो रजसा जगत् ॥ 43
विद्वान्........यो वाग्मी विद्याधु(त्य)भिलाषि(णः) ।
(वाचा) द्रविणवाक् सोमैस् सम्यांश्चके.....यस् सदा ॥ 44
संसारे पि निरालोके दुर्ग्गेण स्खलित(:) क्वचित् ।
दिङ्वर्ग्गजाल सक्तोपि यश् शमैकरतिर्युधि ॥ 45
यशोभिर्द्दीपयन्नाशाः क्रतुज्वलनसर्प्पणे ।
धूमैस् सतिभिराश्चक्रे यो योगी युगपत् सदा ॥ 46
अधर्म्मे यो जड़ो धर्मे पटीयानभवद्रगुणी ।
पङ्गु कुवर्त्मसु व्यक्तं शीघ्रगामी सुवर्त्मसु ॥ 47
धन्यान्येतानि सर्व्वाणि सार्व्वस् सन्तान तारणात् ।
यत्नात् स पालयामास भूपभक्त्यनुभावतः ॥ 48
शिवशक्तयनुभावेन शिवशक्ती विवर्द्धिते ।
शिवशक्ति मुने र्व्वन्धुशिवायास्तां शिवात्मनः ॥ 49
वर्य्याः कीर्त्त्यांगरीयस्यास् सन्ताना ये सदाशाः ।
सन्तानपुण्यपालास्तान् पान्तु पद्मालयादयः ॥ 50
यथा ब्रह्मादिवशकृच्छिवशक्तेश् शिवाढयता ।
हृत्सत्कारुण्यवशकृच्छिववशक्तिं मुनेस्तथा ॥ 51

अर्थ–

VV. 1-4 are identical with VV. 7-10 of RCM No. 71

वह उसकी कम्बुज की लक्ष्मी प्राणा नाम की अनुगामिनी पतिव्रता-सी देवी हुई पृथिवी और लक्ष्मी– दोनों ही लक्ष्मीपति भगवान् विष्णु की सी हुईं ।। 5

जो वह विष्णुबल नामवाला भी लक्ष्मीन्द्र नाम पा सका था, वह जयवर्मन द्वारा एक धन के आधिपत्य पर नियुक्त हुआ था ।। 6

नासा नामक उसका नौकर था जो भक्ति से विश्वासी और अच्छी बुद्धि वाला था । धैर्यरूप रत्न की खान, कल्याणकारी दूसरे भद्र के समान हुआ ।। 7

उसके बाद श्री नृपेन्द्र है आदि में जिसके अर्थात् श्री नृपेन्द्र विजय नाम जिसने पाया था, जो राजा की लक्ष्मी के हरण करने में वीर सेनापति था ।। 8

अपूर्व विलक्षण ऐसा पृथिवी मध्यवाला, राजाओं को दमन करनेवाला, अतिशय महान् नाम पास का, आर्य का ह्यङ चन्द्र यह नाम प्रिय हुआ ।। 9

पवित्रा नामवाली वह पत्नी महाबुद्धिमान विन्द्वर्ध की और प्रभावती प्यारी सुन्दरी हृषीकेश ब्राह्मण की स्त्री थी ।। 10

VV. 11-14 are identical with VV. 11-14 of RCM No. 71 and MKS No. 49

VV. 15-16 are identical with VV. 25-26 of RCM No. 71 and MKS No. 49

महारथ अरुण की पृथिवी नामवाली वैष्णवी से युक्ता शून्या को शिवलिंग सहित पहले राजा के शासन से उसको पाया था ।। 17

उसके पूर्व में चेतना पुरक, दक्षिण में मूषिक स्थला, पशिचम में लोपङ्, उत्तर में लोपङ् पृथ्वी की सीमाएँ थीं।।18

देवी प्राणा नामवाली के भाई के द्वारा जो भाई लक्ष्मीन्द्र नामक था उससे वे दोनों देव हुए दास आदि पूजाओं से यत्न से फिर उन्मीलित आँख खोलनेवाले हुए थे ।। 19

शिव के मन्दिर की पृथिवी को जो मान्य थी वे शासन के द्वारा पुरस्कार करके राजा के प्रिय भक्त धर्म बुद्धिवालों ने प्राप्त की थी ।। 20

उसके पूर्व में नदी सीमा थी तथा दक्षिण में राजेश्वर, पश्चिम में उद्धवपुर, उत्तर देवातिदेवक– ये सीमाएँ थीं ।। 21

वह देवी कम्बुज की लक्ष्मी पतिव्रता, धर्म से बरतनेवाली थी, उसने श्री धर्मवर्द्धन, जो धर्म को बढ़ानेवाला था ऐसे पुत्र को जिसका नाम श्री धर्मवर्द्धन पड़ा, जन्म दिया था ।। 22

ह्यङ्चन्द्र नामवाली उसने परमार्थ शिव के पुत्र को गणेश के, रुद्राणी सहित उमा देवी को सामवेद को पेटङ्– इस नामवाले पुत्र को जन्म दिया ।। 23

प्रभावती इस नामवाली वह चन्द्र के समान सुन्दर आकृति से युक्त अतिशय प्रभावशाली थी । शास्त्रों को जाननेवालों में श्रेष्ठ पुत्र को जिसका नाम अध्यापक था उसे जन्म दिया ।। 24

.............त्रिपुर नामक राक्षस के शत्रु को– शिव को ।। 25

.......शक्ति से शक्ति बलों में श्रेष्ठ को......जन्म दिया देवी उमा को जो उमा के समान थी भी ।। 26

......जो पोङ् नामवाली है वह लक्ष्मी के समान शरीर की शोभावाली है । महात्मा भूपबन्धु पुरुषोत्तम की पत्नी है ।। 27

अध्यापक नामवाला वह राजेन्द्र पण्डित को रुद्राश्रम में राजा के द्वारा नियुक्त प्रयत्नशील अध्यापक हुआ ।। 28

फिर उस राजा का प्रिय परमार्थ शिव पृथिवीन्द्रोपकल्पा नामक प्रसिद्ध श्रीमती को धारण कर सका था ।। 29

उस पोङ् ने गोविन्द को जन्म दिया और लक्ष्मी के समान माधवी नामक पुत्री और दूसरी पुत्री भान् नामवाली को पुरुषोत्तम से जन्म दिया था ।। 30

रामभद्र की प्रिया ने शिव की शक्ति से पञ नामवाली अच नामवाली चाना नामवाली तथा गरुड़ को उत्पन्न किया था ।। 31

विभावसु नामक विद्वान् की प्यारी साध्वी भान् नामवाली नाम से विभाव सो: जो साक्षात् सूर्य का मूर्तरूप–सा लगता था, जन्म दिया ।। 32

उस राजेन्द्र पण्डित ने राजा से दी मुख को राजा के हवन करनेवाले के

द्वारा शिखा शान्ति नामक साले से युक्त हो प्राप्त किया था ।। 33

इस भूमि के पूर्व में तटाक पाद सीमा का दक्षिण में कुटी तटाकक: पश्चिम में शक्तदेवक्ष्मा सीमा है ।। 34

उत्तर में गन्धसारक्ष्मा सीमा उन दोनों के द्वारा उसमें पुनः स्थापित किया गया था । स्वर्णलिंग को त्रिव्योम मूर्तियों से स्थापित किया गया था ।। 35

राजेन्द्र पण्डित का पुत्र नागपाल जो अतिशय विद्वान् है, शिखा शान्ति की बहन का पुत्र था राजा से चंकाक्ष्मा प्राप्त की थी ।। 36

उसके पूर्व में सुरधृट सीमा दक्षिण में सम्रोङ् सीमा है, पश्चिम में लोहका रक्ष्मा सीमा है और उत्तर में नगरी मार्ग सीमा है ।। 37

..........वह..........पुत्र नष्ट हुआ जिसका ऐसे महात्मा का हतति मिरोणाशी इस नाम से प्रसिद्ध ब्रह्मज्ञानी प्रभवज्ञ था ।। 39

सावित्री पञ्चगवी नाम की पुत्री को जन्म दे सकी, माधवी ने कौ नाम की पुत्री को जन्म दिया था । उन धर्मात्माओं की धर्मात्मा सन्तानें हुईं ।। 40

बुद्धिमान साल नामक सेना का अध्यक्ष सेनापति स्थली ग्राम में हुआ जिसने 815 शाके में नये शिवलिंग को स्थापित किया ।। 41

वह शिव की शक्ति से आचार्य हुआ और शिव की शक्ति के विभाग का ज्ञाता हुआ और एक शिव की शक्ति के वासवाला होकर शैवों के आचार्यों का अधिप हुआ ।। 42

जिसके चित्त से कमल हुआ, ब्रह्मा के समान अच्छी बुद्धिवाले के कमल के समान चरणों वाले की धूल से कमल रूप जगत् हुआ ।। 43

जो विद्वान् जो थोड़ा और सार बोलनेवाला, विद्या की ज्योति की इच्छावाले की वाणी से धन-रूप वाणीवाला, चन्द्रों से हमेशा जिसने सब सम्य किया ।। 44

आलोक-रहित संसार में कहीं किले से स्खलित होकर शत्रु-समूह के जाल में फँसे रहने पर भी जो लड़ाई में एकमात्र शान्ति से रति करनेवाला था ।। 45

अपने यशों से दिशाओं को प्रकाशित करता हुआ जो योगी एक बार हमेशा यज्ञाग्नि उड़ने में धुओं से अन्धकार सहित दिशाओं को किया था ।। 46

पापकर्म में जो मूर्ख-सा हुआ, धर्म-कर्म में जो अतिशय चतुर हुआ, खराब रास्तों पर जो लंगड़ा-सा स्पष्ट रूप से प्रतीत हुआ और जो अच्छे मार्गों पर शीघ्रगामी था ।। 47

ये सभी धन्य हैं सन्तान के तारने से शिवभक्त हुआ, यत्न से उसने पालन किया राजा की भक्ति के अनुभाव से ।। 48

शिव की शक्ति के अनुभाव से दो शिव-शक्तियाँ विशेष रूप से बढ़ी हुई, शिवशक्ति नामक मुनि के बन्धु शिवात्मा के कल्याण के लिए हो ।। 49

श्रेष्ठ लोग कीर्ति में अतिशय विशाल हों, जो सन्तान अच्छे आशयवाले हैं, सन्तान के पुण्य के पालनेवाले हैं उन्हें पालें, पद्मालय आदि देवलोग ।। 50

जैसे ब्रह्मा आदि के वश करनेवाले शिव शक्ति की कल्याणाधिकता है, वैसे ही दयापूर्ण हृदय का वश करनेवाले शिव शक्ति मुनि की कल्याणाधिकता थी ।। 51

51

नोम देई मन्दिर अभिलेख
Phnom Dei Temple Inscription

अंगकोर के दस मील उत्तर यह एक छोटी पहाड़ी है । यह अभिलेख संस्कृत और ख्मेर– दोनों भाषाओं में है। संस्कृत में लिखे अभिलेख के भाग से यशोवर्मन के द्वारा मन्दिर के संचालन की सीमा मालूम होती है । हर और अच्युत को यह मन्दिर समर्पित है, जो एकसाथ एक शरीर में मिले हुए हैं और जिन्हें हरिहर कहा जाता है । पुरन्दर या नोम देई नामक पर्वत को यह अधिकार में लिये हुए है ।

इस अभिलेख में केवल दो पद्य हैं ।

यह अभिलेख जॉर्ज सोदेस द्वारा सम्पादित किया गया था ।[1]

द्वि.....पुत्रहरौ यौ च संवृत्तौ भेदमागतौ ।
जगतश् शङ्करौ वन्दे नित्यञ्चैतौ हरीश्वरौ ।। 1

---

1. *BEFEO*, Vol. XVII, p.13

श्री हराच्युतयोस् सीमा श्रीयशोवर्म्मणा कृता ।
श्री हराच्युतयोर्दत्ता श्री पुरन्दर पर्व्वते ॥ 2

अर्थ–

दो – पुत्र, दोनों ईश्वर जो एक ही हैं तथा स्वयं ही भेद प्राप्त किये हैं, ऐसे दोनों जगत् के ताप को शमन करने वाले हरि तथा शिव की नित्य वन्दना करता हूँ ॥ 1

इन दोनों श्री हरि तथा श्री शिव के परकोटे (प्राकार) का निर्माण श्रीमान् यशोवर्मन ने श्री पुरन्दर पर्वत पर किया तथा श्री शिव एवं श्री विष्णु की सेवा में समर्पित किया ॥ 2

52

नोम संडक के खड़े पत्थर का अभिलेख

Phnom Sandak Stele Inscription

यह स्थान नोम संडक नामक छोटी पहाड़ी पर स्थित है । यह कोहकेर से पन्द्रह मील उत्तर एवं डांगरेक पर्वत से 30 मील दक्षिण में स्थित है । यह एक जर्जर मन्दिर है । अभिलेख खड़े पत्थर के दोनों ओर उत्कीर्ण है ।

इस अभिलेख में त्रिमूर्ति देवी, गौरी और सरस्वती की प्रार्थना की गयी है तथा यशोवर्मन का गुणगान किया गया है । इसमें सोमशिव के शिष्य (जिसका नाम नहीं दिया गया है) के धार्मिक आधार को अंकित किया गया है । यह अज्ञात व्यक्ति राजा श्री इन्द्रवर्मेश्वर के राज्य में प्राध्यापक था । राजा यशोवर्मन ने एक राज्य शिव को प्रदत्त किया जिसका नाम अपने पिता के नाम पर रखा और शिवपुर नामक पर्वत पर एक महाविद्यालय की स्थापना की जहाँ उच्च शिक्षा की व्यवस्था

थी । यही प्राध्यापक, जो शिव की आराधना करता था, अवनति की ओर गिरता गया । उसके द्वारा एक लिंग की स्थापना की गयी जिसका नाम भद्रेश्वर था ।

आयमोनियर का विचार है कि इन्द्रवर्मेश्वर लोले के क्षीण हो रहे मन्दिर में देखा जा सकता है और सोमशिव के विषय में उनका विचार है कि वह अवश्य ही शिवसोम है जो इन्द्रवर्मन का गुरु था ।[1] खड़े पत्थर की किनारी पर अभिलिखित ख्मेर-अभिलेख में इनके दान का विस्तृत वर्णन है । आर०सी० मजूमदार के अनुसार खड़े पत्थर पर अभिलिखित यह अभिलेख इसकी स्थापना के बहुत बाद खोदे गये और यह यशोवर्मन के जीवनकाल का नहीं हो सकता ।[2]

खड़े पत्थर के दूसरे पृष्ठ पर त्रिमूर्ति और देवी अर्पणा की आराधना करते हुए जयवर्मन द्वितीय का गुणगान किया गया है । अभिलेख के आठवें पद्य से यह विदित होता है कि कम्बुज के राजपरिवार के अन्त के बाद जयवर्मन द्वितीय राजा हुआ और उसने महेन्द्रवर्मन पर अपनी राजधानी स्थापित की । इसमें पाणिनि के एक सूत्र का भी उल्लेख किया गया है ।

इस अभिलेख में 39 पद्य हैं । भाग (अ) में 26 तथा भाग (ब) में 13 हैं जो सभी स्पष्ट एवं शुद्ध हैं । बार्थ ने इस अभिलेख का सम्पादन किया है ।[3] सर्वप्रथम आयमोनियर ने हमारा ध्यान इस अभिलेख की ओर आकृष्ट किया है ।[4]

भाग (अ)

श्री सिद्धि स्वास्ति जय ।
नमश् शिवाय यत्पादनखज्योत्स्ना विराजते ।
नमेन्द्रमूर्द्धमन्दार मधुसेकादिवोद्गता ॥ 1
रुद्रन्नमत यस्याङ्घ्रि सरोजोदरजं रजः ।
धूमायते सुरशिरोरुहरत्नाग्निकोटिषु ॥ 2
जितन्धूर्ज्जटिना यस्य जटा विस्फुरितारुणाः ।
दहनाशङ्कया शङ्के गङ्गा विशदुमारुषः ॥ 3

---

1. Quoted by R.C. Majumdar in *IK*, p.151
2. *Ibid*
3. *ISC*, p.392
4. *Ibid*, p.545

जितं महावराहेण विषाणौ यस्य राजतः ।
लोकत्रय पद व्यापि यश सामङ्कुराविव ॥ 4
विष्णुन्नमामि यस्याङ्गमा सा पाणौ विभामि भूः ।
द्विटछीकच ग्रहामोदालग्नेव भ्रमराङ्गना ॥ 5
एकोर्ण्णवसरः पद्मे ब्रह्मवक्त्राणि पान्तु वः ।
पद्मानीवोद्गतान्यब्जे मधुकैटभ मृत्यवे ॥ 6
नमन्तु ब्रह्मणः पादपल्लवौ सततारूणौ ।
सुस्थित्यायासनाम्भोजबोधं कर्त्तुमिंव स्वयम् ॥ 7
वन्दे गौरी ह्रिया यस्यास सञ्चुकोच मुखाम्बुजम् ।
नवसङ्गे हरस्येन्दु चन्द्रिको चुम्बनादिव ॥ 8
नमो देव्यै सरस्वत्यै यस्याश् शब्दमयो गुणः ।
अधिदेवतया वायां श्नूयतेऽप्यन्य कीर्त्तने ॥ 9
राजेन्दुश् श्रीयशोवर्म्मा भवत्पूर्णणतरोदयः ।
यशः क्षीरार्ण्णवोत्पूर संप्लावितजगत्रयः ॥ 10
नोपैति नाशमद्यापि कीर्तिर्यस्यातिभास्वती ।
गायि दिव्याङ्गनावक्त्रपीयूष लुठनादिव ॥ 11
नूनन्धात्रामृतेनैव सौन्दर्य्यं यस्य निर्म्मितम् ।
यदक्ष्णा वाष्पमार्ग्गेण विवेश जगतां मनः ॥ 12
न स्ववृद्धिः प्रजावृद्धिं-विना यस्मै स्म रोचते ।
किं स्वयं वर्द्धते चन्द्रस् सिन्धुवेलामवर्द्धयन् ॥ 13
समरे वैरिरक्ताक्तो यस्य खड्गो व्यराजत ।
चरणात्मक्तकाङ्क्षार्द्रः पन्था इव जयश्रियः ॥ 14
अदीर्घनिद्रमागन्तुकामा यं स्वकुलैम् स्थिता ।
कौस्तुभालालनाल्लक्ष्मीश् शङ्के केशववक्षसि ॥ 15
यमसामान्य सौन्दर्य्यं सृष्ट्वा स्रष्टान्वयिन्तयत् ।
उपमानमयञ्चेत्स्याद् उपमेयोऽपरः कथम् ॥ 16
श्रीमान् स्वभावलावय्यो गम्भीरो रत्नसन्निधिः ।
यस् समुद्रसमानोऽपि संपूर्ण्णो न परोदयैः ॥ 17
तस्य राज्ये मुनिवरो मुनिवन्धाङिघ्र पङ्कजः ।

नाम्ना सोमशिवश् शास्त्ररत्न रत्नाकरोऽभवत् ॥ 18
भगवच्छिदवसोमस्य शिष्यो यो धरणीभुजा ।
श्रीन्द्रवर्म्मेश्वर क्षेत्रेऽध्यापकत्वे न्ययुत्यत ॥ 19
शिवशास्त्रार्ण्णवं बुद्धिमन्दरेण विमथ्य यः ।
स्वयं ज्ञानामृतम् पीत्वादययान्यान पाययत् ॥ 20
गलन्नधुर साकार शब्दशास्त्र मनोहरे ।
सरस्वती मधुकरी यस्यास्याब्जे रताभवत् ॥ 21
देवता गुरु विप्रार्य्यातिथि पूजाविधौ कृती ।
गरीयसामपि गुरूर्य्यो जघन्य इवाभवत् ॥ 22
स श्राचार्य्य इदं लिङ्गमैशं शिवपुरे गिरौ ।
क्षीणपूजञ्चिरत्वेन पूजावृद्धया व्यवर्द्धयत् ॥ 23
स चात्र सम्यग्विधिना श्रीभद्रेश्वरमाख्यया ।
शैलेन्दु मूर्त्तिशाकाब्दे शिवलिङ्गमतिष्ठिपत् ॥ 24
धनान्येतानि दत्तानि केदारारामकिङ्करान् ।
तेनाभ्यां मिश्रभोगाभ्यां पान्ति ये यान्तु ते दिवम् ॥ 25
लभन्तां यातनान्ते तु नरकेष्वाभुवः स्थितेः ।
अवीचिरैरवाधेषु मर्द्दयन्ति हरन्ति ये ॥ 26

भाग (ब)

श्रीसिद्धि स्वास्ति जय ।
नमोऽस्तु शम्भवे यस्य निष्कलस्यापि चिन्तने ।
भास्वन्मूर्त्तौ सकलता दर्श्शेन्दोरिव दृश्यते ॥ 1
विभाति धूर्ज्जटिजटा गलद् गङ्गाम्बु विन्दुभिः ।
तद्धारमौक्ति कैश्चन्द्र कोटिच्छेदच्युतैरिव ॥ 2
जयति त्रिपुरध्वंसी यस्याङ्घ्रिनखभा बभुः ।
आलढ़ि भारनागेन्द्र रोषवह्नयद्भा इव ॥ 3
नमोऽस्तु हरये यस्य पदः पद्माङ्कशायिनः ।
भाभिस्तन्नाभिरवदद् भिन्न नीलाब्ज सन्निभा ॥ 4
स्वयम्भूः पातु वो यस्य भास्वत्-वर्ण्णनिमंवपुः ।
आभाति संभवम्भोजकञ्जल्क स्पर्शनादिव ॥ 5

वन्देऽपर्ण्णां पदोर्य्यस्याः गुल्फौ लीनौ विराजतः ।
आसन्न तरसर्प्पाभनू पुरातिभयादिव ॥ 6
आसीच्छ्री जयवर्म्मेति भूपधीनामधीश्वरः ।
भूपाल मौलिरत्नांशुवर्द्धिताङ्घ्रिनरवद्युतिः ॥ 7
योऽभूत्प्रजोदयायैव राजवंशेऽतिनिर्म्मले ।
अपङ्कजमद्यपद्मे पद्मोद्भव इवोदितः ॥ 8
रामा यं वीक्ष्य जल्पन्ति कामाभिमिषलोचन ।
न हि नो मनसोऽपैति सुभगोऽयं क्षणादिति ॥ 9
यस्य रूपोपमेयत्वं न स्यात् स्यादपि विघ्नगम् ।
मुखच्छायानुरूपो हि चन्द्रमा राहुणावृतः ॥ 10
नातिभारा भुजे यस्य धराम्भोनिधिमेखला ।
यथा ज्याघातकिणता भूभृतोऽपि व्यनामयत् ॥ 11
सिंङ्हमूद्धर्न्यासनं यस्य राजमूर्द्धनि शासनम् ।
महेन्द्राद्रेःपुरी मूर्द्धिन तथापि न तु विस्मयः ॥ 12
सद्धर्म्मनिरतेर्य्यस्य पदं राज्येन चक्तिरे ।
उपसर्ग्गाः क्रियायोगे ते प्राग् धातोर्म्मुनेरिव ॥ 13

भाग (अ)

अर्थ–

उस शिव को नमस्कार है जिसके चरण के नखों की ज्योति शोभती है । हिमालय के शिखर पर मन्दार के फूल के मधु के सिंचन से मानो उत्पन्न हो ।। 1

उस रुद्र को नमन करो जिसके चरणकमल से उत्पन्न धूल धुएँ के समान आचरण करता है- देवों के केश-रूप रत्न के समान करोड़ों अग्नियों में ।। 2

जीता गया है शिव के द्वारा जिसकी जटा से विशेष रूप से फड़कती हुई लाल आग की शंका से, लेखक शंका करता है कि गंगा उमा के क्रोध के भय से जटा में छिप गयी ।। 3

महावराह से जीते गये जिसके दो सींग शोभते हैं तीनों लोकों के पदों में व्याप्त होनेवाले यश के अंकुरों के समान ।। 4

विष्णु को नमन करता हूँ जिसके अंग की छवि वह हाथ में विशेष शोभा पाती पृथ्वी है । मानो भ्रमर की स्त्री शत्रु के केश पकड़ने के हर्ष से लगी हो ।। 5

जब एकारा विद्या उस सरोवर के कमल में ब्रह्मा के सभी मुख तुमको पालें जो कमलों के समान कमल में उत्पन्न हैं मधु और कैटभ राक्षस के मारने के लिए ।। 6

ब्रह्मा के सर्वदा लाल चरण पल्लवों को लोग नमन करें, सुन्दर स्थिति के परिश्रम-रूप कमल का बोध करने के लिए मानों स्वयं तत्पर हों ।। 7

उस गौरी की वन्दना करता हूँ जिसकी लज्जा से मुखरूप कमल संकुचित शिव के नवीन संगम में मुखरूप चन्द्र की चन्द्रिका के चुम्बन से मानो लजाकर मुँद गया हो ।। 8

श्री देवी सरस्वती जी को नमस्कार है जिनका शब्दमय गुण वाणी की अधिष्ठात्री देवी के द्वारा भी अन्य के कीर्तन में भी सुना जाता है ।। 9

राजाओं में चन्द्रमा के समान श्री यशोवर्मन अतिशयपूर्ण उदयवाला हुआ जिसके यशरूप दुग्ध समुद्र से पूरी पटी हुई त्रिलोकी हो ।। 10

जिसकी कीर्ति अति सोहनेवाली आज भी नष्ट नहीं हुई है गानेवाले देव-स्त्री के मुख के अमृत पर लोटने के समान आज भी है ही ।। 11

निश्चित ही ब्रह्मा ने अमृत से ही जिसके सौन्दर्य का निर्माण किया, जिसकी आँख से आँसू के रास्ते से लोगों का मानस पैठ गया हो ऐसा लगता है ।। 12

जिसे प्रजा की वृद्धि के बिना अपनी वृद्धि नहीं रुचती थी, समुद्र की वृद्धि के बिना क्या चन्द्रमा स्वयं ही बढ़ता है ।। 13

जिसकी तलवार वैरी के रक्त से लथपथ होकर विशेष सोहती थी, चरण के अलता भीगे रास्ते पर जैसे विजयरूपी लक्ष्मी शोभती थी ।। 14

लेखक शंका करता है कि लक्ष्मी कम सोनेवाले के घर पर अपने कुलवालों के साथ स्थित रहती है अतएव श्री विष्णु भगवान् के हृदय पर समुद्र से

ही निकली कौस्तुभमणि लक्ष्मी का सहोदर भाई है, उसके प्यार करने के कारण ही तो लक्ष्मी विष्णु के हृदय पर विराजती है । यह श्लोक स्वकुलवालों के साथ वहाँ रहती है लक्ष्मी जहाँ उसके सहोदर का प्यार होता है ।। 15

जिस असाधारण सुन्दरता को पैदा करके ब्रह्मा पछताने लगे कि यदि उपमा नहीं उपमा न होने पर दूसरा बचा कौन जो उपमेय हो सके कैसे हो सके ? उपमानमय विश्व में उपमेय दूसरा मिले कौन ? अद्वितीय सौन्दर्य सृष्टि श्री यशोवर्मन हैं– यह तात्पर्य है ।। 16

श्रीलक्ष्मीवान् शोभावान् मनोहर गम्भीर रत्न के निकट या रत्नों की शोभा अच्छी निधि जो समुद्र के समान होकर भी दूसरों के उदयों से सम्यक् रूप से पूर्ण नहीं है ।। 17

उसके राज्य में मुनियों में श्रेष्ठ मुनियों द्वारा प्रणाम करने योग्य चरणकमलों वाला नामतः सोमशिव थे जो शास्त्ररूप रत्नों का समुद्र हुआ ।। 18

भगवान् शिवसोम के शिष्य जो राजा द्वारा श्रीन्द्रवर्मेश्वर क्षेत्र में शिक्षकत्व में नियुक्त हुए ।। 19

जिसने बुद्धिरूपी मन्दार पहाड़ द्वारा विशेष रूप से मथ करके शिव शास्त्ररूप समुद्र को स्वयं ज्ञानरूप अमृत पीकर कृपा करके दूसरों को भी पिलाया ।। 20

जिसके गिरते हुए मधु (पुष्प रस, मधु=मद्य, मधु=शहद, मधु नामक एक राक्षस है) यहाँ मधु=मधुर गिरते मधु रसवाले आकार के व्याकरण जो मनोहर हैं, उस मुख कमल में मधुकरी=भ्रमरी के समान सरस्वती रत हुई ।। 21

देवता, गुरु, ब्राह्मण, श्रेष्ठ, अतिथि की पूजा की विधि में प्रयत्नवान् अतिशय गुरुओं के भी गुरु जो हत्यारे के समान हुआ ।। 22

उस आचार्य ने शिवपुर में पहाड़ पर जघन्य शिवपुर पर्वत पर ईश के लिंग को कम पूजावाले को बहुत कालों तक जारी रहनेवाली पूजाओं की वृद्धि के माध्यम से विशेष रूप से बढ़ाया ।। 23

उसने यहाँ सम्यक् प्रकार से नामतः श्रीभद्रेश्वर शिवलिंग की प्रतिष्ठा

811 शक संवत् में की ।। 24

धन इतने दिये खेत, वाटिका, नौकर-चाकर, टहलू वगैरह बहुत बहुत इन मित्र और भोगों से जो रक्षा करता है, वे स्वर्ग जाएँ ।। 25

जो इन दिये पदार्थों का हरण करता है, वे जबतक पृथिवी टिकी रहेगी, तबतक अवीचि नरक, रौरव नरक आदि नरकों में यातनाएँ पाते हैं ।। 26

भाग (ब)

उस शिव को नमस्कार है जिसके कालहीन रूप के भी चिन्तन में प्रकाशित मूर्ति में कलाओं सहित रूप देखा जाता है जैसे सूर्य और चन्द्र के संगम के समय का दृश्य हो ऐसा ही लगता है ।। 1

शिव की जटा सोहती है गिरते हुए गंगा जल की बूँदों से उसकी धारारूपी मुक्ताओं से करोड़ों छेदोंवाले चन्द्रमा से चूते अमृत के समान लगती है ।। 2

त्रिपुर नामक राक्षस को नाश करनेवाले की जय हो, जिस शिव त्रिपुरारि के पैरों के नखों की छवि शोभती है । पृथिवी के भार को धारण करनेवाले गजराज के क्रोधरूपी आग की छवि के समान शोभती है ।। 3

उस विष्णु को नमस्कार है जिनके चरण लक्ष्मी की गोद में सोनेवाले हैं । प्रकाशों से उनकी नाभि बोली– गहरे नीलकमल के समान है । जो नाभि गहरी है, उससे नीले कमल की उत्पत्ति है उसी के समान ।। 4

तुम लोगों की रक्षा ब्रह्मा जी करें जिनका शरीर चमकते हुए सोने के प्रकाश के समान है । शरीर शोभता है मानो पैदा हुए कमल के केसर का स्पर्श उसने किया हो ।। 5

देवी पार्वती को नमस्कार है जिसने शिव के लिए तपस्या करते समय पर्ण तक खाना छोड़ दिया था, अतएव अपर्णा कहलाती हैं, जिसके चरणों के घुटी डूबी हुई है और शोभती है । गुल्फ की हड्डी मांस से डूबी रहे तो उसकी प्रशंसा होती है । अतिशय समीप रहनेवाले साँप की आभावाले नूपुर के भय से मानो डरकर डूबी हो ।। 6

सभी राजाओं का अधीश्वर श्री जयवर्मन इस नाम से ख्यात् था, जिसके पैरों के नखों का प्रकाश राजाओं के सिरों के रत्नों की किरणों से बढ़ा हुआ है ।। 7

अतिशय स्वच्छ राजकुल में जो उत्पन्न हुआ था प्रजा के उदय के लिए ही पंक न रहने पर भी महाकमल में ब्रह्मा के समान जो उदित हुआ था ।। 8

स्त्रियाँ जिसे देखकर कहती हैं यथेच्छ रूप से टकटकी लगाकर देखती हुई यह कहती हैं कि हमारे मन से यह सुन्दर दूर नहीं जा पाता– यह एक क्षण भी मन से नहीं हटता है ऐसा अतिशय सुन्दर दीख पड़ रहा है ।। 9

जिसके रूप की उपमा नहीं हो सकती, यदि हो भी सकी तो विघ्न से भरी हुई उपमा हो सकेगी क्योंकि चन्द्रमा राजा के मुख की छाया से मिलता-जुलता है पर वह तो राहु से घिरा हुआ है और मुखरूप चन्द्र तो वैसा नहीं है ।। 10

जिसकी बाँह पर पृथिवी जिसकी डॅड़कस सात समुद्र है अतिशय भारवाली नहीं है । जैसे धनुष की डोरी की चोट से काला धब्बा है उसने राजा को भी विशेष नाम बढ़ाया था ।। 11

जिसका आसन सिंह के मस्तक पर है और जिसका शासन राजाओं के मस्तक पर है । महेन्द्र नामक पहाड़ के मस्तक पर जिसकी पुरी है तो भी कोई अचरज नहीं है ।। 12

अच्छे सनातन धर्म में निरत जिसका चरण राज्य से सत्कार पानेवाला है । क्रिया में जब उपसर्ग जोड़ते हैं तो क्रिया से पूर्व ही उसका स्थान मुनि के समान रहता है ।। 13

53

फिमनक अभिलेख

Phimanaka Inscription

अंगकोर थोम में एक भवन है जिसे फिमनक कहते हैं । अंशतः संस्कृत और अंशतः ख्मेर-भाषा में यह अभिलेख इस भवन के द्वार पर उत्कीर्ण है । अभिलेख के प्रारम्भ में त्रिमूर्ति की प्रार्थना के साथ-साथ माधव (कृष्ण) जिसे त्रैलोक्यनाथ कहा गया है, की स्थापना का वर्णन है । यशोवर्मन के मन्त्री ज्योतिष एवं नक्षत्र विद्या में निपुण था । ख्मेर मूल लेख में दासों की एक सूची भी है । इस अभिलेख में कुल 12 पद्य हैं ।[1]

सिद्धि स्वास्ति पान्तु विष्णु चरणाम्बुजरेणवः ।
पितामह महेन्द्रादि शिरोरत्नाङ्शुचारवः ।। 1
वन्देऽचिन्त्यगतिं विष्णु(ं) प्रकृत्या यस्यवक्षसि ।
स्थिता लक्ष्मीर्भुजे भूमिर्नाभिपद्मे प्यजस् सदा ।। 2
ब्रह्माव्जगन्ध सन्तान.................विग्रहाम् ।

1. *ISC*, p.345

वन्दे गोविन्ददृद्धारि................नीं श्रियम् ॥ 3

आसीदशेषभूपाल मस्तकधृतशासनः ।

राजेन्द्रश् श्रीयशोवर्म्मा महेन्द्रोपेन्द्रविक्रमः ॥ 4

युद्धमायुधयोधादि मदान्धोभेन्द्र भीषणम् ।

प्राप्य यस्य प्रतापेऽर्क्को दृष्टश्चन्द्रो यशस्यपि ॥ 5

यस्याङ्गसङ्गि सौन्दर्य्यविसरैर्ह्लादिता रतिः ।

स्वभर्तृवधवैधव्यञ्जहौ सा वञ्चनाभिव ॥ 6

यशोयस्यं मनोहारि शारदेन्दुकरादपि ।

क्रीड़ायां शयने याने गीयतेऽधापि देहिभिः ॥ 7

तस्य राजाधिराजस्य होराशास्त्राब्धिपारगः ।

यश् श्रीसत्याश्रयाख्योऽभून्मन्त्री मन्त्रीव बज्रिणः ॥ 8

करङ्कङ्कलशं पात्रन्तारं रैरशनाभापि ।

सितच्छत्रस्मितां लक्ष्मीं यो लेभे स्वामिभक्तितः ॥ 9

तेनैव स्थापितो भक्तया भगवग्निह माधवः ।

स श्रीत्रैलोक्यनाथारण्यो यश् श्रियाभाति भूतले ॥ 10

सुवर्ण्णं रजतङ् क्षेत्रमारामङ् किङ्करंस्त्रियम् ।

कल्पितं यो हरेन्मोहादितो यातु स दुर्ग्गतिम् ॥ 11

द्वित्रयष्टाब्दे विद्यातुर्म्मद्युसितदिवसे याति कन्यादिमिंदौ

मेषं शीतेतराङ्शौ सबुधरविसुते मेषमिन्द्रारिपूज्ये ।

तौलं क्षोणीतनूजे वृषभमरगुरौ द्वन्द्वराशिञ्च लग्ने

स श्रीत्रैलोक्यनाथम् स्थित इह भगवान् वो विभूतिं विधेयात् ॥ 12

अर्थ–

पितामह (ब्रह्मा) महेन्द्र आदि के शिरोरत्न की पवित्र किरणें तथा विष्णु चरणकमल की धूलि सिद्धि, कल्याण दें तथा रक्षा करें ॥ 1

स्वभावतः जिनके वक्षस्थल पर लक्ष्मी, भुजाओं में भूमि तथा नाभि-कमल में ब्रह्मा भी स्थित हैं, उन भगवान् विष्णु नमस्कार है ॥ 2

इन्द्र और विष्णु के समान पराक्रमी राजाओं का राजा श्री यशोवर्मन था जिसके शासन को समस्त भूपाल मस्तक पर धारण करते थे ॥ 4

युद्ध, शस्त्र, योद्धा आदि मदान्ध हाथी जो सबमें श्रेष्ठ है, उसके समान भयंकर जिसके प्रताप को पाकर उसके यश में सूर्य और चन्द्रमा भी दृष्टिगत होता है ।। 5

जिसने अपने पति के वध से प्राप्त वैधव्य को वंचना की तरह छोड़ दिया है वह कामदेव की पत्नी रति राजा यशोवर्मन के अंगों की सुन्दरता के प्रसार से प्रसन्न होती है ।। 6

शरदकालीन चन्द्रमा की किरणों से भी जिसका यश मनोहारी है (उस राजा के) यश का गुणगान आज भी लोग खेलते, सोते और चलते करते हैं ।। 7

उस राजाधिराज (यशोवर्मन) का मन्त्री जो ज्योतिषशास्त्ररूपी समुद्र में पारंगत था, वह इन्द्र के मन्त्री के समान श्री सत्याश्रय नाम से प्रसिद्ध था ।। 8

जिसने श्री सत्याश्रय स्वामी की भक्ति से करंक कलश, पात्र तथा धनरूपी करधनी को तथा श्वेत छत्र के समान प्रसन्न लक्ष्मी को पाया था ।। 9

उसने भक्ति से भगवान् माधव की यहाँ स्थापना की जो त्रैलोक्यनाथ के नाम से प्रसिद्ध होकर पृथिवी पर लक्ष्मी से शोभित होते हैं ।। 10

दान में दिये स्वर्ण, चाँदी, खेत, फुलवारी, नौकर का जो हरण करे, वह मोह मोहित होकर दुर्गति को प्राप्त करे ।। 11

जिस त्रैलोक्यनाथ की स्थापना उसने (राजा ने) शक संवत् 832 में चैत्र शुक्ल पक्ष में, कन्या में चन्द्रमा के जाने पर, मेष में सूर्य के जाने पर, बुध और शनी से युक्त इन्द्र के शत्रु राक्षसों से पूज्य तथा तुला में मंगल के जाने पर, बृहस्पति के वृष में जाने पर, लग्न में द्वन्द्व राशि के जाने पर किया था, वे भगवान् श्री त्रैलोक्यनाथ तुम लोगों के लिए ऐश्वर्य का विधान करें ।। 12

54

बयांग अभिलेख
Bayang Inscription

इस अभिलेख में भगवान् शिव की प्रार्थना तथा यशोवर्मन के गुणगान का वर्णन है । अभिलेख में आमराभावा नामक एक ऋषि का वर्णन है जिसे राजा द्वारा कई प्रकार के विरुद प्राप्त थे । यह ऋषि एक महान् विद्वान् था । यह उत्तरी इन्द्राश्रम के प्रधान के पद पर नियुक्त किया गया था जो मन्दिर का प्रधान था । इन्होंने ईश्वर के लिए दक्षिणी घाटी में एक शाला का निर्माण करवाया । जब एक तालाब खुदवाया जा रहा था तो उसे सोने का एक ताबा मिला जिससे उसने उत्सव मनाने के लिए शिव की एक मूर्ति बनवायी, जिसे 'उत्सव' मूर्ति कहा गया है ।

इस अभिलेख में केवल 18 पद्य हैं जो केवल पद्य संख्या तीन को छोड़कर सभी शुद्ध हैं । इस अभिलेख का सम्पादन जॉर्ज सोदेस ने किया है ।[1]

---

1. *IC*, p.256

श्रियं वो धूर्ज्जटिः पातु यस्याङ्घ्रेः भारयीडया ।
वधिरीकृत सर्व्वाशान्दशास्यो व्यकृत स्वरान् ॥ 1
कम्बुजाधिती राज्ञां मूर्द्धस्वाहितशासनः ।
श्रीन्द्रवर्म्मेति राजा यो दिक्षु ख्यातपराक्रमः ॥ 2
सेवाराज समाहारमौलिरत्नांशुर्गिमैः ।
रत्नसिंहासनं यस्य द्विगुणीकृतशोभनम् ॥ 3
एकैकाष्टशकाप्तराज्यश्रीः श्रीयशोनिधेः ।
श्रीयशोवर्म्मनामा सत्तिस्य पुत्रः प्रतापवान् ॥ 4
धर्म्मावियोगिकृत्यस्य राज्ये यस्य कृतं युगम् ।
परोक्षमप्यति प्रीत्या वर्तमानम् भूदिव ॥ 5
यतो निर्य्याय सत्कीर्त्तिर्भूयसी परितो दिशः ।
दूराद्धश्रमतप्तेव पस्पर्शाम्भो महोदधेः ॥ 6
तेन राज्ञा कृतज्ञत्वात् सम्पद्भिर्य्यो यतीश्वरः ।
सौवर्ण्णभस्म पात्राक्षमालाद्याभिः सुसत्कृतः ॥ 7
परार्द्ध्यमासनं पद्मदलकेसर पंक्तिमत् ।
यतीनामाद्यिपत्येन योऽध्यास्ते स्म नृपाज्ञया ॥ 8
शैवज्योतिष शब्दार्थवादि शास्त्रार्थ वेदिना ।
येनात्मान्तर्त्रिगूढ़ोपि योगेन ददृशे शिवे ॥ 9
श्रीन्द्रवर्म्मनियुक्तो य उत्तरेन्द्राश्रमाधियाः ।
तीयं विज्ञापयामास दुर्लभं भोग्यमाश्रये ॥ 10
इति विज्ञापितो येन श्रीन्द्रवर्म्मावनीश्वरः ।
तटाकं कारयामास नरैर्विषयावासिभिः ॥ 11
तटाके खन्यमाने यत् सौवर्ण्णगुरुमण्डलम् ।
पूर्व्वोपनिहितं भूमावुद्धतं खननीद्यरैः ॥ 12
येनेदं प्रतिमायै तच्छम्मोर्भवतु भूपते ।
राज्ञो विज्ञापितस्येति साधुवाच्यनुकूलता ॥ 13
शाम्भवी प्रतिमा येयं सौवर्ण्णी शिविकास्थिता ।
नीयतेऽद्यापि यस्तस्याः निमित्तमभवत् किल ॥ 14
श्रीयशोवर्म्मणा पश्चात् स्वाश्रमेऽधिकृतः पुनः ।

य आचार्य्याधिपत्येन लब्धवान् प्रवरासनम् ।। 15
यदयशो हारकह्लारनीहाराकृति कान्तिमत् ।
निष्कलङ्कं कलावन्तं कलङ्काङ्कमिवाहसत् ।। 16
प्राणि प्राण परित्राण प्रधान परिमाणतः ।
यो रागी वीतरागोपि शिवत्वैकत्ववेदितः ।। 17
स एवामर भावाख्यो यतीनां प्रवरो गुणैः ।
शालामकृत देवस्य दक्षिणोपत्यकातले ।। 18

अर्थ–

तुमलोगों की लक्ष्मी की रक्षा शिव करें जिनके पैर के भार की पीड़ा से सभी दिशाओं के बहरे होने पर रावण ने विकृत स्वरों का उच्चारण किया था ।। 1

कम्बुज का अधिपति सभी राजाओं पर शासन करनेवाला श्री इन्द्रवर्मन नाम का था जिसका पराक्रम सभी दिशाओं में प्रसिद्ध था ।। 2

सेवा करनेवाले राजाओं के समूह के मस्तक के रत्नों की किरणों के निकलने से जिसका सिंहासन रत्नजटित था दुगुना सोहता था ।। 3

811 शक में श्री यशोनिधि से राज्य पानेवाले के प्रतापी पुत्र श्री यशोवर्मन नाम के थे ।। 4

धर्म के अनुसार कार्य करनेवाले के राज्य में जिसने सत्ययुग ला दिया था अति प्रीति से परोक्ष को वर्तमान बना डाला था मानो कलि में सत्ययुग आ गया ।। 5

जहाँ से निकलकर अच्छी कीर्ति सभी दिशाओं में बार–बार प्रकाशित हुई थी दूर से प्रकाशित परिश्रम से तभी से समुद्र के जल को छू लिया था ।। 6

उस राजा के द्वारा कृतज्ञता के कारण सम्पत्तियों से जो संन्यासियों में श्रेष्ठ सुवर्ण के बने भस्म पात्र, रुद्राक्ष माला आदि से सुन्दर रीति से सत्कृत हुए ।। 7

अधिकाधिक मूल्यवान् आसन जिसमें कमल पत्र केसर की पंक्ति थी, संन्यासियों के स्वामित्व से राजा की आज्ञा से आसन पर बैठते थे ।। 8

शिव–संबंधी दर्शनशास्त्र, ज्योतिषशास्त्र के शब्दों के अर्थ लगाने में

वादी प्रतिपक्षियों से शास्त्रार्थ करनेवाले थे जिन्होंने आत्मा के अन्दर छिपे भाव को भी शिव में योग क्रिया द्वारा देखा था ।। 9

श्री इन्द्रवर्मन द्वारा नियुक्त हुए जो उत्तरवाले इन्द्राश्रम के स्वामी थे । उन्होंने आश्रम में दुर्लभ योग्य का विज्ञापन किया था ।। 10

यह विज्ञापन कर देने पर जिसके द्वारा श्री इन्द्रवर्मन राजा ने विषयी लोगों के द्वारा तड़ाग खुदवाने का काम किया था ।। 11

तड़ाग खोदते समय सुवर्ण का भारी समूह पहले से रखा हुआ पृथिवी से खोदने के हथियारों से निकला ।। 12

वे सभी सुवर्ण समूह शिवजी को दिया गया इस बात के विज्ञापन से अनुकूल धन्यवाद के भागी राजा हुए थे ।। 13

जो यह प्रतिमा शिव की है वह सुवर्ण की शिविका पर स्थित सुवर्ण से बनी है, वह आज भी जैसी-की-तैसी, उन्हीं के निमित्त मानी गयी थी ।। 14

पीछे श्री यशोवर्मन द्वारा फिर अपने आश्रम पर अधिकार किया गया था जो आचार्य के आधिपत्य से श्रेष्ठ आसन लोभ कर चुके थे।।15

जिनका यश हार माला के समान सफेद कमल के समान, बर्फ के समान सफेद था कलंकहीन यश कलंकवाले चन्द्र को मानो हँसने वाला था ।। 16

प्राणियों के प्राणों के सभी प्रकारों से रक्षण प्रधान परिमाण से करनेवाले जो रागी विरक्त होकर भी एक शिव ही है विश्व में दूसरा नहीं ऐसा समझनेवाला था ।। 17

संन्यासियों के श्रेष्ठ गुणों से युक्त जो ही अमरभाव नाम से विख्यात था दक्षिण घाटी के समीप सभी देवों को फतिंगों के समान आकृष्ट करनेवाले हुए थे ।। 18

55

अंगकोर थोम अभिलेख

Angkor Thom Inscription

गकोर थोम के दक्षिणी–पश्चिमी किनारे में बसे एक ऊँचे स्थान पर पत्थर के टुकड़े पर यह अभिलेख खुदा हुआ है । राजा इन्द्रवर्मन की प्रशंसा, उनके राजगद्दी पर बैठने की तिथि और उनकी धार्मिक नींव इस अभिलेख में वर्णित है । यशोवर्मन की प्रशंसा तथा उनके द्वारा की गयी नींवों का विवरण भी इसमें शामिल है । यह अभिलेख यशोधर तटाक की खुदाई की ओर इंगित करता है ।

इस अभिलेख में पद्यों की संख्या 14 है । पद्य–संख्या 3 के अतिरिक्त सभी अस्पष्ट हैं ।

इस अभिलेख का सम्पादन जॉर्ज सोदेस ने किया था ।[1]

1. *BEFEO*, Vol. XXV, p.304

... ...।

गुरुभार्गव वाल्मीकि .... ॥ 1

आसीदशेषभूाल ....तरो वरः ।

श्रीन्द्रवर्म्मेति मेदिन्याः पुरा नृपतिविक्रमः ॥ 2

नवरन्ध्राद्रिराज्योपि नीरन्ध्रो यो वसुन्धराम् ।

विद्धे स्थापितैर्द्दे(वै) र्विभ्रतीन् त्रिदिवश्रियम् ॥ 3

समरे समवीर्य्येण ....इह ।

विप्रा मानैर्वुद्या वाग्भि ......विनोदैतव्रताः ॥ 4

तस्य सूनुरनूनर्द्धि ....।

श्रीयशोवर्म्मदेवाख्यः ....॥ 5

व्यक्तं राजेन्द्रचन्द्रोपि चन्द्र ....।

प्रतापैः ....॥ 6

उद्युक्तं यं समुद्वीक्ष्य ....।

(अभ्यव) हरतीवेन्द्रः शरान् ....॥ 7

.....................यो नित्य(म्) रण...।

वृद्धक्षीणबलञ्चन्द्रम् ....यः ॥ 8

अङ्गेन(त्व)ङ्ग सौन्दर्य्यमैश्वर्य्य...यः ।

विरुद्धमपि विभ्रागो यो वभावविरोधिनाम् ॥ 9

सकलां यः कुला ....पुरः कृतयु...यम् ।

प्रदर्शयन् धर्म्मपरः ....प्रजापतिरभूत् परः ॥ 10

धरनी धरनीनाथं ......न्नधिमवाप्य यम् ।

धर्म्मकामार्थ सम्पूर्ण सप्रजा ....॥ 11

जगाम् निर्गमे यस्य ....।

ददौ दिक्पाल मौलि ....॥ 12

यशोधर तटाकाख्यं ....यः ।

यत्रन्यभूभुजां कीर्त्ति ....॥ 13

स्वर्गादागत्य गाङ्गोमां ....।

ब्रह्मविष्णवीश्वरादीनां ....॥ 14

अर्थ–

.....................................।

गुरु बृहस्पति भार्गव शुक्राचार्य, वाल्मीकि जी ।। 1

जो था, सभी राजाओं..........................अतिशय श्रेष्ठ ।

श्री इन्द्रवर्मन इस नाम से प्रसिद्ध पृथ्वी का पहले राजा के विक्रमवाला ।। 2

श्री इन्द्रवर्मन नाम से प्रसिद्ध, विक्रमशाली राजा जो पृथ्वी पूर्व दिशा में 799 शकाब्द में राज्य करते हुए भी, स्वर्गीय सौन्दर्य को धारण करने वाली देवमूर्तियों की स्थापना से पृथ्वी को निर्दोष बनाया ।। 3

युद्ध में समान बल वाले से ....यहाँ इस लोक में। सम्मानों से ब्राह्मण लोग, वाणियों से पण्डित लोग......... विनोदों से विषयों में रत रहने वाले (सन्तुष्ट हुए) ।। 4

उनके पुत्र बहुत धनवाले...। श्री यशोवर्मनदेव इस नाम से प्रसिद्ध ...।। 5

स्पष्ट रूप से सभी राजाओं के श्रेष्ठ चन्द्र के समान चन्द्र ...... प्रतापों से .. .... ।। 6

उद्योग में लगे जिनको भली-भाँति देखकर...। मानों इन्द्र बाणों का व्यवहार करते हों...।। 7

.........जो प्रतिदिन युद्ध ....। बढ़ने और घटनेवाले बलशाली चन्द्र को...... जो ।। 8

अंग से अंग के सौन्दर्य को, ऐश्वर्य ......जो । विरुद्ध धारण करनेवाले भी जो अविरोधियों के बीच सोहते थे ।। 9

सभी को जो कुला ...पुर= आगे सत्ययुग ...जिसको प्रदर्शित करते हुए धर्म में लीन ... दूसरे प्रजापति हुए थे ।। 10

जिस पृथिवीनाथ को पृथिवी ने पाकर ... पाकर ...जिसे । धर्म, काम, अर्थ से सम्पूर्ण प्रजा सहित ...।। 11

जिसके निकलने पर ... गया था... । दिया, दिशाओं के रक्षकों के मस्तक ......।। 12

यशोधर तड़ाग नाम से प्रसिद्ध को ... जो । जहाँ दूसरे राजाओं की कीर्ति ....।। 13

स्वर्ग से आकर के गंगा-संबंधी उमा को । ब्रह्मा, विष्णु और शिव आदि के ....।। 14

56

अंगकोर थोम अभिलेख
Angkor Thom Inscription

गकोर थोम के दक्षिणी–पश्चिमी भाग में अवस्थित एक मन्दिर के पत्थर के एक टुकड़े पर यह अभिलेख उत्कीर्ण है। इस अभिलेख में संस्कृत एवं ख्मेर– दोनों भाषाओं का प्रयोग किया गया है ।

संस्कृत के मूल लेख में विष्णु की मूर्ति की स्थापना तथा समरविक्रम नामक यशोवर्मन के मामा के द्वारा मन्दिर को दिये गये दानों का वर्णन है ।

इस अभिलेख में पाँच पद्य हैं । केवल पद्य-संख्या 1 ही स्पष्ट एवं शुद्ध है, शेष टूट जाने के कारण अपठनीय हैं ।[1]

विक्रमान्तं दधन्नाम् समरादिश्रियोज्जलम् ।

---

1. विस्तृत विवरण के लिए लेखक की पुस्तक *Studies in Sanskrit Inscriptions of Ancient Cambodia*, New Delhi, 1974, पृ. 100 देखें।

मातुलो यस्य भव्यश् श्रीयशोवर्म्ममहीपतेः ॥ 1

तेनेयं प्रतिमा विष्णोः प्रभविष्णोर्महर्द्धिना ।

.....ता स्थापिता शान्तयशश् शुद्धेन्दुमूर्त्तिना ॥ 2

.....जगतां नाथं तं ग्रावमहाह्रदस्थिते विष्णौ ।

.....तण्डुलमद्धढिकं तस्मै ॥ 3

....विष्णोर्व्वितीर्ण्णन्तेन यः...............।

....यथा तन्नो विनाशितम् ॥ 4

....न्तश्चिरविभवविभुत्वं भूतले लिप्समाना ।

...तेषु रिपुधनवा..........म् मा कुरुध्वंचिरेणा ॥ 5

अर्थ–

जिस श्री यशोवर्मन महाराज के प्रकाशमान यशवाले सुन्दर, समर विक्रम नामवाले मामा हैं ॥ 1

उस विपुल धनवाले पूर्णिमा के चन्द्रमा के समान रूपवाले स्थिर यश ने ही प्रभु विष्णु की इस मूर्ति को स्थापित किया ॥ 2

57

वट थिपेदी अभिलेख
Vat Thipedi Inscription

सियम रियप ज़िले में अवस्थित वट थिपेदी नामक एक छोटे मन्दिर में इस अभिलेख का पता चला ।

इस अभिलेख के प्रारम्भ में शिव, विष्णु, ब्रह्मा तथा उमा की प्रार्थना के पश्चात् राजा यशोवर्मन तथा उनके दो पुत्रों, हर्षवर्मन प्रथम तथा ईशानवर्मन द्वितीय की प्रशस्ति है । इसमें विद्वान् ऋषि शिखा शिव और उनके दानों की चर्चा है । इस विशेष मन्दिर की बनावट तथा भद्रगिरि पर्वत पर भगवान् शिव के तीन लिंगों की स्थापना तथा यशोधर तटाक के निकट भी तीन लिंगों की स्थापना की चर्चा है ।

संस्कृत के मूल लेख में एक विशेष शैली की चर्चा है जो लम्बे-लम्बे मिश्रित अत्युक्ति तथा अनुप्रास का प्रयोग है । संस्कृत के अलंकारशास्त्री इसे गौड़ शैली का चिह्न मानते हैं ।

जॉर्ज सोदेस के विचारानुसार यह इस तथ्य को सिद्ध करता है कि इस अभिलेख के लेखक ने गौड़ देश में प्रशिक्षण प्राप्त किया था । यह इस बात का प्रमाण है कि भारत एवं कम्बोडिया के बीच सम्बन्ध कायम था ।

इस अभिलेख में कुल 19 पद्य हैं जो सभी शुद्ध हैं ।

जॉर्ज सोदेस[1] एवं आयमोनियर[2] के द्वारा इस अभिलेख का सम्पादन किया गया ।

नमोऽनङ्गाङ्गनिर्भङ्गसङ्गिने पि विरागिणे ।
अङ्गनापधनालिङ्गलीनार्द्धाङ्गाय शम्भवे ॥ 1
पातु वः पुण्डरीकाक्षवक्षो विक्षिप्तकौस्तुभम् ।
लक्ष्मीस्तनमुखाक्लिष्टकषण क्षामचान्दनम् ॥ 2
बोधध्वद्ध्वान्तसंरोधविनिर्धूत प्रजाधिये ।
ध्वान्तध्वद्वेदनादर्द्धिमेधसे वेधसे नमः ॥ 3
वन्दे देहार्द्धतानीतामुमां मदनविद्विषा ।
समक्षमदन प्लोषदोष प्रक्षालनादिव ॥ 4
सिद्धिं सरस्वतीसूतां या शुभ्रां विभ्रती तनुम् ।
उदिता पूर्व्वमन्यस्मिन्नपि देवे विवक्षिते ॥ 5
शशिशीतांशु मूर्त्तिश्रीदृतारिश्रीः कलाश्रयः ।
राजेन्द्रश् श्रीयशोवर्म्मा भासिताशो रूचाभवत् ॥ 6
तेजस्सौन्दर्य्यगाम्भीर्य्यधैर्य्याभिजृम्भितः ।
सूर्य्येन्दूदधि शौरीरास् सम्भूयेव वभूव यः ॥ 7
दानदाक्षिण्यचारित्र माधुर्य्यादि गुणैर्नयन् ।
वशी विश्वान्यपि वशं यस्तेजो न जहौनिजम् ॥ 8
श्रीहर्षवर्म्मा तनयस् सत्पदं प्राप्त शविना ।
तेजोनुरागनम्रेन्द्र भौलिलीढ़ाङ्घ्रि पङ्कजः ॥ 9
यस्याविखण्डदोर्द्दण्ड वीर्य्याग्र्गसितदिङ्मुखे ।
कान्ताकीर्त्तिरदृष्टान्यै रेमे भुवनमन्दिरे ॥ 10

1-2. लेखक की पुस्तक *Studies in Sanskrit Inscriptions of Ancient Cambodia*, New Delhi, 1974 का पृ० 101 देखें ।

तमन्वपि कनीयांसं सोदर्य्यन्तिग्मतेजसम् ।
श्रीशान्वर्म्माणमिता लक्ष्मीरर्क्कमिवोडुपम् ।। 11
त्याग श्रद्धाकलाकान्ति शौटीर्य्य प्रमुखाश्रये: ।
गुणानां समुदायोऽपि यो ध्येयः परमः पुमान् ।। 12
तेभ्यस् स्तुतापदानेभ्यो यो ऽर्हो ऽवाप महार्हगोम् ।
सस्वर्ण्णदोलारशनाकरङ्का तपः वारणाम् ।। 13
व्याख्यातानेक शास्त्रत्वात् सिद्धान्ताचार शासनात् ।
आचार्य्याणां य आचार्य्यो ग्रामणीर्य्योगिनामपि ।। 14
विशुद्धासांख्यतर्कोऽपि शब्दविद्यादिवाङ्मये ।
षट्तर्क्काभ्यासरागं यो न तत्याज कदा च न ।। 15
प्रज्ञा श्रद्धा क्षमा लज्जा करुणा सत्यवादिता ।
स्त्रीष्वासु नित्यसक्तोऽपि यो गुणाख्याशु संयमी ।। 16
शिखाशिवेन तेनास्मिन्नाचार्य्येनाफलार्थिना ।
द्विरामाष्टराके भक्तया कृतेयं देवतास्थितिः ।। 17
तेनापि लिङ्गत्रितयं शम्भोर्भद्रगिरौ गिरौ ।
स्थेयसे स्थितये स्थाणौ भक्तेस् स्थापितमुज्ज्वलम् ।। 18
यशोधरतटाकस्य दक्षिणेनापि सन्निधौ ।
तेनापि लिङ्गत्रितयं स्थापितं गुरुशासनात् ।। 19

अर्थ–

उन शिवजी को नमस्कार है जिन्होंने कामदेव के अंगों का नाश किया और फिर भी वे संगी होकर विरागी हैं । आधे अंग से श्रीगौरी को अपने साथ रखते हैं और शम्भु कहे जाते हैं ।। 1

तुम लोगों की रक्षा विष्णु जी का वक्षस्थल जहाँ कौस्तुभ मणि है । श्री लक्ष्मी जी के स्तनों के मुखों से घिसे जाने पर चन्दन लगा हुआ है ।। 2

श्री ब्रह्मा जी को नमस्कार है जो अन्धकार दूरकर बोध देते हैं, प्रजापति हैं । वेदों के स्वर के उच्चारण से धारणावाली बुद्धिवाले हैं ।। 3

कामदेव के शत्रु शिव द्वारा जिस उमा को अपनी देह का आधा स्थान दिया गया है उन श्री उमा जी को नमस्कार है मानों सामने कामदेव की हरकत रूप

दोष के धोने के लिए ही उन्होंने ऐसा किया हो ऐसा मालूम पड़ता है ।। 4

श्वेतसिद्धि-रूपी सरस्वती को नमस्कार है । पहले दूसरे देव में भी बोलने की इच्छा से उग गयी ।। 5

श्री यशोवर्मन चन्द्र के शीतल किरण के समान मूर्तिवाला, शत्रु की लक्ष्मी और शोभा को लेनेवाला, कलाओं का आश्रय, राजाओं का स्वामी, सभी दिशाओं को प्रकाशित करनेवाला अपनी शोभा से सम्पन्न था ।। 6

जो तेज, सुन्दरता, गम्भीरता, धीरता से युक्त है; सूर्य, चन्द्र, समुद्र, शनि– सबके मिले-जुले तेजों से पैदा हुआ था ।। 7

दान, निपुणता, सच्चरित्रता, मधुरता आदि गुणों के साथ इन्द्रियों को वश में रखनेवाला, विश्व को वश में करनेवाला जिसने अपने तेज को नहीं त्यागा ।। 8

श्री हर्षवर्मन पुत्र ने इन्द्र की बाँह के समान अच्छा पद पाया, तेज, अनुराग, नम्रता से युक्त इन्द्र के मस्तक से स्पर्श किये गये जिसके पैरोंरूपी कमल ।। 9

जिसके पूर्ण दोनों बाँहें रूप दण्डों के बल से किवाड़ लगाने का काम सभी दिशाओं के मुखों में हुआ था । सुन्दर स्त्री के समान जिसकी कीर्ति समस्त विश्व में रमण करनेवाली थी ।। 10

उसके बाद छोटे भाई श्री ईशानवर्मन द्वारा लायी हुई लक्ष्मी सूर्य के समान चन्द्र के समान थे ।। 11

जो त्याग, श्रद्धा, कला, कान्ति, सौन्दर्य के मुख्य आश्रय थे । गुणों के समूह होने पर भी जो परम पुरुष के समान ध्यान करने योग्य हैं ।। 12

उनसे प्रशंसा किये जाने पर भी जो महान् पूजा के योग्य पदार्थों सुवर्ण का डोला, चँवर और छत्र आदि पाये थे ।। 13

अनेक शास्त्रों के ज्ञाता, सिद्धान्त और आचार के शासन से आचार्यों के भी आचार्य हुए योगियों के भी अग्रगण्य थे ।। 14

विशुद्ध सांख्य और तर्क ज्ञाता होकर भी व्याकरणादि शास्त्रों में छः प्रकार के दर्शनों, तर्कों के अभ्यास के प्रेम को कभी जिसने न त्याग किया

था ।। 15

बुद्धि, श्रद्धा, क्षमा, लज्जा, दया, सत्यवादिता स्त्रियों में शीघ्र नित्य सक्त होकर भी जो गुणों में संयमी थे ।। 16

उनके द्वारा फल न चाहनेवाले आचार्य के द्वारा 832 शक में भक्ति से देव-प्रतिष्ठा की गयी ।। 17

शिव के तीन लिंग स्थापित किये गये भद्रगिरि नामक पहाड़ पर अतिशय स्थिति के लिए तथा शिव में भक्ति उज्ज्वल हो इसके लिए ।। 18

यशोधर तड़ाग के दक्षिण की ओर निकट में गुरु के शासन से उनके द्वारा भी तीन लिंग स्थापित किये गये ।। 19

58

वट चक्रेत मन्दिर अभिलेख

Vat Chakret Temple Inscription

बा नोम के इलाके में यह अभिलेख पाया गया है। खड़े पत्थर के दोनों ओर संस्कृत तथा ख्मेर-भाषाओं में इस अभिलेख को उत्कीर्ण कराया गया है। यशोवर्मन के पुत्र हर्षवर्मन के द्वारा अद्रिव्याधपुरेश नामक शिव के मन्दिर को महिला दासों को दान देने की चर्चा इस अभिलेख में है।

इस अभिलेख में पद्यों की संख्या 4 है जिनमें पद्य-संख्या 2 अस्पष्ट है, शेष सभी स्पष्ट एवं शुद्ध हैं। बर्गेगने ने इसका सम्पादन किया है।[1]

1. *ISC*, p.551

(नम्) द्वो (न्) धूर्ज्जटेः रङ्ङ्घ्र पङ्कजस्य रजोलवः ।

नम्रासुरेन्द्रदेवेन्द्र मौलिरत्नाङ्शुदीपितम् ॥ 1

आसीद्राजाधिराजो यस्तेजोवन्दित ...... ।

भूभृतामुत्तमाङ्गेषु.......................पाद ॥ 2

नाम्ना श्रीहर्षवर्म्मा सश् श्रीयशोवर्म्मपुत्रकः ।

श्रियाभिनवया जुष्टश् श्रीनिवास इवावभौ ॥ 3

कम्बुजेन्द्राधिराजोऽसौ जगद्गीतगुणाम्बुधिः ।

अद्रिव्याधपुरेशेऽदात् षट् कान्ताः प्रतिपक्षम् ॥ 4

अर्थ–

वह श्री यशोवर्मन का पुत्र, अभिनव सम्पदा से युक्त भगवान् श्री निवास के समान ही हुआ ।। 3

437 शकाब्द में कम्बुज देश के सिंहासनारूढ़ होनेवाले एकच्छत्र शासक ने अद्रिव्याधपुरेश महाकाल शिव को छः सुन्दरियाँ प्रदान किया ।। 4

59

प्रसत थोम अभिलेख
Prasat Thom Inscription

ह केर में प्रसत थोम नाम से एक मन्दिर है । राजा जयवर्मन चतुर्थ के द्वारा त्रिभुवनेश्वर नामक भगवान् को दिए गये दान की चर्चा इस अभिलेख में है । इन्हीं देवता की कृपा से वे राजाओं के राजा बने । जयवर्मन के द्वारा अपनी राजधानी को कोह केर में ले जाने का भी वर्णन इस अभिलेख में है ।

इस अभिलेख में पद्यों की संख्या 3 है जो सभी नष्ट हो चुके हैं ।[1]

श्री सिद्धि स्वस्ति जय ।
योऽनादिरादिरखिलस्य चतुर्म्मुखादे
र्व्विस्ट - तनुरष्ट तनूस्तनोति ।

1. *ISC*, p.555; BEFEO, Vol. XXXIII, p.12

- -.-. -. -.- -

--. - स्त्रिभुवनेश्वर नाम धामे ॥ 1

शाकेन्द्रो हुतभुक् समुद्रवसवः पोष्यौष्टमाहःसितः

सूर्य्यः सैन्दव - -.-. -. -.- -।

...कलशं कविः समुदयो मानं दध्यात्क्कर्जः

कालाः कार्य्यकराः क्रमेण..---. -.- ॥ 2

कृत्वा साकमशेषभूपतिपतिं यं हेतुमात्रं हस्

सिद्धिं यः सदसि श्रिया- -.-. -. -

तेन श्रीजयवर्म्मणा नृपतिना विजयिना राज्यस्य

भक्त्या सर्व्वमदीयत त्रि- -.-. --.- ॥ 3

अर्थ–

जो सभी ब्रह्मा आदि देवताओं अनादि पुरुष और आदि पुरुष हैं ....शरीरवाले, आठ शरीरों को विस्तारित करते हैं.............त्रिभुवनेश्वर नाम से प्रसिद्ध धाम हैं ।। 1

जो 841 शाके में पौष शुक्ल पक्ष में, सूर्य, चन्द्र के साथ ....कलश को शुक्र के उदय मान को धारण कर शनि समय पर कार्य करने वाले नौकर क्रमशः.. ....।। 2

करके साथ-साथ, सभी राजाओं के राजा जिसको हेतुमात्र को, सभा में लक्ष्मी से सिद्धि को जो पाता है, उस श्री जयवर्मन राजा के द्वारा, विजयी के द्वारा, राज्य के आश्चर्यकारी श्रेष्ठभाग को भक्ति से सब कुछ दिये गये त्रि...........।। 3

60

प्रसत डैमरे अभिलेख
Prasat Damrei Inscription

यह स्थान कोह कोर में है । इस अभिलेख में राजा जयवर्मन की प्रशस्ति तथा उनके बड़े भाई राजेन्द्रवर्मन की धार्मिक योग्यता के लिए शिवलिंग की स्थापना की चर्चा हम पाते हैं ।

अभिलेख में पद्यों की कुल संख्या 20 है ।

इस अभिलेख का सम्पादन जॉर्ज सोदेस ने किया था ।[1]

1-4 are illegible.

यस्योज्ज्व ....-.... मपाय

महीभुजां वज्र -.... य-.... य ।

धनायत ....- पयं - तत्

---

1. *IC*, p.56

सुमण्डितक्र र् - शोपयञ्च ॥ 5
विभ्रद्धन् (उस् स्व) न्धृतसर्व्ववर्ण्णम्
उद्दष्टवद्धत्रवलार्द्दनो यः ।
उच्चैः पद् - ण्यकृतां वरिष्ठस्
साक्षात् सहस्त्राक्ष इवाबभासे ॥ 6
सृष्टयाम् त सत्व हिते प्रधाने
˘ - अयानामपकारके पि ।
यस्मिन्˘ सा (˙) ख्या विरजस्तमस्काः
केनापि षाड्गुण्ययुता गुणौधा (:) ॥ 7
सं (ब)र्द्धमानै˘˘ कर्म्म - - स्
संयोगवद्भिस् समवायकाले ।
द्रव्यस्य सर् ऐ˘˘ -˘ वैः प्राक्
प्रायेण यस्यानशनी बभूवे ॥ 8
हीनोप --˘˘ -----
सप्रत्यया यस्य ससाधुशब्दा ।
अङ्गोय - -˘˘ -----
प्रकाशयामास मुखे पदार्थान् ॥ 9
तेजो र - -˘˘ -----˘ -
रगे षु राज्ञां पटुकोटिपातैः ।
चूड़ामज्य - -˘˘ -----˘ - -
˘आदिपदिं सहसा रूषेव ॥ 10
त्रिशक्तिश - -˘˘ --˘ - -
- - यकस् संहृतकलकूटः ।
उपक्रमा -˘ -˘ - - - -
- - राद्यस्य नयाब्धिमन्थः ॥ 11
यत्र प्रय -˘˘ -˘ -
- - -˘ माद्यद्द्विपदान वर्षैः ।
धामाग्नि दग्धान्य अ˘˘ - -
- - -˘ - नम्रदलान्यभूवन् ॥ 12

खड्गस्त्रुवो द्विड्रुधिर˘ -
- - -˘ - वे कृशानौ ।
मन्त्री गलन्मौक्तिकला˘ - -
-˘ -˘ - या भृशमाजिलक्ष्मी (म्) ॥ 13
भास्वत्कलावद्युतयो म ग ग धू
- यस् सदेव्यस्य तदात्मकव्वात् ।
तासां स्थितिं पर्य्यबसन्दि दृक्षु(र्)
ब्बंभ्रम्यते दिक्ष्विव यस्य कीर्त्तिः ॥ 14
विचित्रयञ्चित्तवतान्नु चेतस्
सञ्चूर्ण्णयन् मानहृताञ्च मानम् ।
उग्रस्य लिङ्गन्नवद्या गरिष्ठम्
अतिष्ठिपद्यो नवहस्तनिष्ठम् ॥ 15
महान्धकारोऽध्वरधूम धूत्याः
प्रचण्डतेजोमिरवग्नाहोभूत् ।
वृष्टिः प्रकृष्टा वसुदन्तिदानैर्
य्यस्मिन् क्षितिं रक्षति विष्टपानाम् ॥ 16
कालेषु कालेय कलङ्कपङ्कैर
द्दिग्धाङ्कितान् लोकगणांश्चिराय ।
त्रिलोचन स्त्राणतया विलोच्य
भूमौ ध्रुवं स्वांशमतारयद्यम् ॥ 17
यस्याद्भुतान्वाक् पतयोऽप्यभूवन्
पदं पदं प्रत्यखिलं गुणौद्यान् ।
नालन्नु संख्यातुमतीवदिव्य-
कालेन धीरा इव शब्दराशीन् ॥ 18
तेन श्रीजयवर्म्मणा विजयिना ज्येष्ठस्य धर्मस्थिति-
प्राप्त्यै लिङ्गमिदं शिवस्य परतस् संकल्पितं स्थापितम् ।
सौंदर्य्यस्य धृतश्रियार्थयुतया राजेन्द्रवर्म्माख्यया
ख्यातस्याग्रसरस्य कीर्त्तिगुणधीवीर्य्याप्यताशालिनाम् ॥ 19
अदित वस्तुतसमस्तं भक्तितोऽस्मिन् शिवेऽसा-

वकृत च शिखराभं सौधवेश्मोद्निराजः ।
अनियतगति मीशञ्चैकवृद्धोक्षमीक्ष्यं
धनिसखमिव कुर्व्वन्नेकवासं धनाद्यम् ॥ 20

अर्थ–

जिसका श्वेत ....मघाय राजाओं का वज्र .... जो .....य जो धन के अधीन ....जल दूध ....वह सुशोभित..........।। 5

धनुष धारण किये हुए धारण किया है सभी वर्णों को दुष्ट वृत्रासुर के बल को पीड़ित करनेवाला .... जो ऊँचे पुण्यवानों में श्रेष्ठ, साक्षात् इन्द्र के समान शोभता था ।। 6

सृष्टि में सत्त्व बल, हित, प्रधान, अपकार करने वाले पर भी जिसमें .... वह धूलरहित अन्धकारपूर्ण किसी से छः गुणों से युक्त गुणों के समूह ....।। 7

भली-भाँति बढ़ते हुए .....काम ....स् संयोग वालों के साथ मिलने के समय ।

द्रव्य का ......पहले .... शायद जिसका ....हुआ था ।। 8

हीन ....

विश्वास से युक्त जिसके ठीक शब्द हैं ।

अंग .....

प्रकाशित किया मुँह में पदार्थों को ।। 9

तेज .... युद्धों में .... राजाओं के चतुर करोड़ हथियारों के पतनों से सिर की मणि=मस्तकालंकार

पहली पीढ़ी यकायक मानो क्रोध से ।। 10

तीन शक्तियाँ .... कालकूट नामक विष का संहार करनेवाला उपक्रम .... पहले के .... नीतिरूप समुद्र का मथना ।। 11

जहाँ ....मतवाले हाथी के मद की वर्षा से ..... धाम की आग ...... जले हुए दूसरे ....लते-पत्तोंवाले हुए........।। 12

अंगकोर थोम के निकट मेबन का मन्दिर है । शिव, गौरी, नारायण, ब्रह्मा और गंगा की प्रार्थना के बाद इस अभिलेख में कौण्डिन्य और सोमा से प्रारम्भ होकर राजा राजेन्द्रवर्मन की वंशावली है । इसमें राजा की विस्तृत प्रशस्ति हम पाते हैं । धार्मिक कार्यों की सिद्धि हेतु विभिन्न स्थानों पर राजा द्वारा निर्माण के लिए नींव डाली गयी थी जिनमें सिद्ध शिवपुर नामक स्थान में 'लिंग सिद्धेश्वर', इसी स्थान पर एक लिंग एवं पार्वती जी की दो मूर्तियाँ एवं पार्वती, विष्णु एवं ब्रह्मा की शिवलिंग के साथ मूर्तियाँ, जिन्हें 'श्री राजेन्द्रेश्वर' कहकर पुकारा जाता है, का भी वर्णन हम पाते हैं ।

इस अभिलेख में चम्पा शहर के जलने तथा बौद्ध सिद्धान्तों की भी विस्तृत चर्चा हमें मिलती है । राजेन्द्रवर्मन के इस अभिलेख में पद्यों की कुल संख्या 218 है ।

फिनौट द्वारा इस अभिलेख का सम्पादन किया गया था।[1]

त्रैगुण्याद्यशिरवीन्दु भास्कर कर प्रद्योतनोद्नीथजै-
रग्रैयः पद्मजकञ्जदृकत्रिनयनैरध्यासितैः शक्तिभिः ।
संरौधस्थिति सम्भवात्भरतये भिन्न स्त्रिधैकोऽपियः
तस्मै नित्य चिते शिवाय विभवे राज्ञोऽर्थ-सिद्ध्यै नमः ॥ 1
रूपं यस्यनवेन्दुमण्डितशिखं त्रय्यां प्रतीतं परं
बीजं ब्रह्महरीश्वरोदयकरं भिन्नं कलाभिस्त्रिधा ।
साक्षादक्षर मामनन्ति मुनयो योगाधिगम्यन्नमः
संसिद्ध्यै प्रणवात्मने भगवते तस्मै शिवायास्तुवः ॥ 2
एका...प्राक् कलहंस विभ्रमगतिः कान्तोन्मदायासती
भित्त्वाङ्ग गगनोदतात्मरते या तानवत्वं पुनः ।
पद्मं मानससंभृतं निजरुचि प्रोज्जृम्भितं विभ्रती
सा शक्तिः शिव सङ्गजोदयरकरी गौरी परा पातुवः ॥ 3
येनैतानि जगन्ति यज्वहुतभुग्भास्वन्नमस्वन्नमः
क्षित्यम्मः - क्षण दाकरैः स्वतनुभिर्व्यातन्वतै वाष्टभिः ।
उच्चैः कारणशक्तिरप्रतिहता व्याख्यायते न क्षरं जीयात् ।
कारणकारणं स भगवानर्द्धेन्दु चूड़ामणिः ॥ 4
नारायणन्मत यो विभुतां वितन्वन्
लोकत्रयन् त्रिपदलङ्घितमात्रमेव ।
द्रष्टा तुरीयपदमाप्तुमिवाधुनापि
निद्राच्छलेन विदद्याति समाधिमब्धौ ॥ 5
अम्भोजभर्ज्जयति यो वदनैश्चतुर्भि-
रोङ्कारवारिदरवं समभुज्जगार ।
क्षेत्राहितन् त्रिभुवनोदय पूरणार्थ-
उच्छूनता मिव नयन्निजवीजमाद्यम् ॥ 6
मन्दांशुमण्डलविनिर्गत वारिधारा

---

1. *BEFEO*, Vol. XXV, p.309. विस्तृत विवरण के लिए लेखक का *Select Cambodian Inscriptions*, Delhi-7, 1981 देखें।

मन्दाकिनी जयति धूर्ज्जटिना धृता या ।
मूर्द्धा नगेन्द्रतनयार्द्ध शरीर सन्धेः
प्रमानुबन्धमिव दर्शयितुं प्रकृष्टम् ॥ 7
आसीदानीर राशेर वनिपतिशिरोरत्नमालार्च्चिताङ्घ्रि-
र्वाला दिव्याभिधानोऽप्यरिकुलक मलोपप्लावाखण्डचन्द्रः ।
खोभा कौण्डिन्य वंशाम्बरतल तिलको भूपतिर्भूरिकीर्त्ति-
र्दोर्द्धण्डोद्योतिता निन्दित पुरभरितनं राज्य लक्ष्मीं वहन् यः ॥ 8
प्रोद्दृप्तद्विषतान्दद्यद् युधिबधूवैधव्यदीक्षाविधिं
बद्व्वन् यश् शिशिरांशुरश्मि विशदां सत्कीर्त्तिमालां गुणैः ।
स्वर्गद्वारपुरे पुरन्दर प्रस्पर्द्धिसंवर्द्धने
सार्थश् शार्व्वमतिष्ठिपत् सविभवं लिङ्गं विधानान्वितम् ॥ 9
ब्रह्मक्षत्र परम्परोदयकरी तद्भागिनेयी सती
पुण्यन्नाम सरस्वतीति दधती ख्याता जगत्पावनी ।
नानाम्नायगिरां गम्भीरमधिकं पात्रं द्विजानां वरं
सिन्धूनामिव सिन्धुराजमगमद् या विश्वरूपं प्रियम् ॥ 10
सोमाद्य सारभूते निजकुलनिवहे भूरिद्याम्नि व्यातीते
रुद्रोपेन्द्रामरेन्द्र प्रभृति सुरवैरस् सङ्गते नन्दनार्थम् ।
तद्वङ्शक्षीरसिन्धोः प्रविकलित यश पारिजाताभिजाता
लेभे जन्मावदाता भुवनहितकरी या द्वितीयेव लक्ष्मीः ॥ 11
या नाम्नापि महेन्द्रदेव्यभिहिता भूभृत्सुतैवेश्वरी
देवी दिव्यविलासिनी भिरसकृत्सङ्गीयमान स्तुतिः ।
भा स्वद्वङ्श-.-.-.- पुराधीशावनीशात्मजो
यां संप्राप्य महेन्द्रवर्म्मनृपति स सार्थामधादीश ताम् ॥ 12
लक्ष्मीन्तीक्ष्णेत रांशोरधिकमधरयेन् ध्वस्तदोषान्धकारो
वद्ध्रन् पद्मानुवन्धं प्रकटिततपसा तेन पत्या प्रजानाम् ।
देव्यान्तस्यामदित्यान्दि वसकर इवोत्पादितः कश्यपेन
श्रीमद्राजेन्द्रवर्म्मावनिपति रभवत्तेज सामा करो यः ॥ 13
दुग्धाम्बुराशेरिव पूर्णचन्द्र-
श्चण्डोशुरत्नादिव चित्रभानुः ।

शुद्धान्वयाद् यो नितरां विशुद्धः
प्रादुर्व भूवोखिल भूपबन्धः॥ 14
तेजः प्रकाशस्तमसो विनाशो
दिशां प्रसादः स्फुटता कलानाम् ।
यत्तिग्मतेजस्तुहिनांशु कृत्यं
येनोदये तन्निखिलं वितेने ॥ 15
रम्योऽपि सम्यक् प्रसवेन सौम्यः
सन्तानकस् सन्ततमुद्रतेन।
महाफलं यं समवाप्य भूयः
रूरोह कोटिं रमणीयतायाः ॥ 16
विबर्द्धमानोऽन्वहमिद्धकान्ति-
र्वपुर्विशेषेण मनोहरेण ।
यस् सर्व्वपक्षोदयमादधान-
स्तिरश्च कारैव हिमांशु लक्ष्मीम् ॥ 17
यः शैशवे ऽप्याशुं तया कलाभिः
पूर्ण्णोऽन्वहं शब्दगुणेऽति दीप्तः ।
यथा कला वत्त्वम पीन्दुलब्ध-
ज्जाड्यान्विदूरमधश्चकार ॥ 18
निरस्य दोषान् प्रसरं स्फुरन्ती
प्रकाशितार्था भुवनेऽश्नुवाना ।
विद्यानवद्येन मुखेन यस्य
प्राक् संगतैनीव दिनस्य दीप्तिः ॥ 19
आसाद्य शक्तिं विबुधोपनीताम्
माहेश्वरीं ज्ञानभयीम मोद्याम् ।
कुमारभावे विजितानिवर्ग्गो
यो दीपयामास महेन्द्रलक्ष्मीम् ॥ 20
पृथुप्रतीत प्रथितं गुणौद्येः
सद्वंशजातं प्रद्यने प्रद्यानम् ।
धनुर्महत् क्षत्रकुलञ्च तुल्यं

यश् शिक्षया नामयतिस्म् तुङ्गम् ॥ 21
शिष्टोपदिष्टं प्रतिपद्य सद्यः
क्षेत्रं यमुत्कृष्टमकृष्टपच्यम् ।
श्रद्धाम्भसा सिक्तमरक्षदुच्चैः ।
शास्त्रस्य चास्त्रस्य च बीजमग्रयम् ॥ 22
यः सर्व्वतस् सर्व्वगुणान् परिम्ना
रूचेस् सदाधारविशेष मुञ्झन् ।
उपाददे लोकहिताय भास्वान्
रसानिव प्रत्यहमस्ततन्द्रिः ॥ 23
उद्यानभागस्य वसन्त संय-
दिवाभृतांशोरिव पौर्णमासी ।
आभुष्णती यस्य विशेषशोभां
समुज्जजृम्भे नवयौवनश्रीः ॥ 24
यत्रापि पुंसो महतः प्रकृत्या
निरूपितं लक्षणमस्तशेषम् ।
केनाप्य सांख्यागमवद्विभाव्यं
प्रकाशयामास महेशभावम् ॥ 25
बाल्यात् प्रबृद्धं प्रभृतिप्रभूतं
यद् यस्य सौन्दर्य्यमनन्यलब्धं ।
ध्रुवं विधातावय वीचकार
तद्रञ्जयन यौवनकान्तिमृद्धाम् ॥ 26
निरुध्यमानः सततं मनोभू-
र्य्यस्य स्फुटे नूतन यौवने पि ।
सौन्दर्य्य सन्दर्शनजात लज्ज
इवान्ति कन्नोपससर्प दर्प्यात् ॥ 27
यस्याङ्ग लावण्य मनन्य रूढं
दृष्टा रतिः प्रेमनि मीलिताक्षी ।
मन्ये न मेने पतिमात्मनीनं
पिनाकिनेत्राग्नि शिखावलीढ़म् ॥ 28

धनुर्व्विकर्ष प्रततोरुशक्ति-
र्युव प्रवीरो युवराज लक्ष्मीम् ।
अयोनिजां यो जनकोपनीतां
सीतां सतीं राम इवोदुवाह ॥ 29

यदार्क्क बिम्बादिव हेमकुम्भा-
दम्भोभृते नागत्पताभिषेकः ।
ततः प्रभृत्येव विवृद्धिभाजा
भूतं हिमांशोरिव यस्य लक्ष्म्या ॥ 30

स्नानाम्बुभिस्तीव्रममन्त्र बन्धै-
स्तेजोनलो यस्य समेधतेस्म ।
तत्स्पर्द्ध येवाश्रुजलैः पतद्भि-
र्द्विषां समं शोक हुताशनोऽपि ॥ 31

अलङ्कृतेनाकृतकैश् श्रुताद्यै-
र्द्धद्यैर्न्निजाङ्गैश्च निसर्गकान्तैः ।
अग्राम्यभूषो पचयेन येन
विभूषणं मङ्गलमित्युपात्तम् ॥ 32

नवां नवां ध्यानमहाभिषेके
यो भुक्त रत्नाभरणा बभार ।
पीताम्भसः कुम्भभवेन लक्ष्मी-
मम्भोनिद्येरूदुत रत्न राशेः ॥ 33

उच्चावचेरूच्च पदाधिरूढै-
ग्रहैर्भियेवा कृत विग्रहोऽपि ।
आरोपितो यः स्वयमप्यकाङ्क्षः
सिंहासने हाटकशैलतुङ्गे ॥ 34

यस्याङ्गकान्तेः क्व तथानवद्यं
विद्येत मन्ये प्युपमान मन्यत् ।
संक्रांत मादर्शतले पि बिम्बम्
अनर्घ माधारवशान्निजं यत् ॥ 35

यत्राभिषिक्ते पततामीसार्द्रा

वसुन्धरा वारिधिचारुकाञ्ची ।
ऊर्द्ध्वीचकारै कमिवात पत्रं
यशस्स्फुरच्यन्द्र कलावदातम् ॥ 36
स्वलक्षणा लक्षित सर्व्वसम्पत्
फलं समाख्याति पुरो विपाकम् ।
यस्याशिषो विपग्रप्रयुक्ताः
कृतानुवादा इव सम्बभूवुः ॥ 37
द्विरेफमाला इव पारिजात-
न्धियो मुनीनाभिव चात्मयोगम् ।
व्यापार मन्यज्जगतां विहाय
दशो द्वितीयं प्रतिपेदिरे यम् ॥ 38
इतस्ततो विद्युदिवाद्युतत् श्री-
स्तावन्नृणाणां प्रचला प्रकृत्या ।
रम्या शरत् प्रादुरभून्न यावत्
यदीय यात्रा समयो निरभ्रा ॥ 39
तीबास्त्रनीराजन राजितश्री-
र्द्दीप्तो महामण्डल दीक्षया यः ।
विधाङ्गमन्त्रैश्च कृतात्म गुप्ति-
रासा (धय)त् सिद्धिमुदारभूतिम् ॥ 40
यस्मिन् विभज्य प्रचलत् पताकाम्
पताकिनीं दिग्विजयाय याति ।
द्विड्राजलक्ष्मीः प्रचचाल पूर्व्वं
उर्व्वी तु पश्चात् बलभारगुर्व्वी ॥ 41
निशम्य सौमित्रिमिवाभियाने-
ऽभिगर्ज्जितन्निर्ज्जितमेघनादम् ।
तूर्य्यध्वनिं यस्य दशास्यतुल्यै-
दूर्राद् द्विषद्भिर्विभयाम्बभूवे ॥ 42
प्रतापवह्लेरिव धूमजालं
बलोद्धतं यस्य रजः प्रयाणे ।

अपयस्पृशद् वैरिविलासिनीना-
मुदश्रयामास विलोचनानि ॥ 43
क्षमान्निपीड्य प्रथमं प्रवृत्तः
स्त्रोतांसि कालुष्यमथो रजोभिः ।
याने नयन् यस्य समुत्पपात
संघश्चमूनामिव बद्धरोषः ॥ 44
कीर्ण्णः क्वचिद् भज्जितभूमिभृद्भि-
रूवास्य मानः परवाहिनीभिः ।
क्वचिच्य यस्य प्रततः प्रयातुः
स्ववहिनीमार्ग्ग इवास मार्ग्गः ॥ 45
वियत् . -. - - वरणञ्जनाना-
ञ्चेष्यस्वशक्तिं विहतं प्रकाशम् ।
यद् यत् प्रदोषस्तनुते तमोभि-
स्तत्तच्च कारारिषु बलैर्य्यः ॥ 46
वितव्य पक्षद्वयमात्तनादं
यस्मिन् रयात् तक्ष्य इव प्रपन्ने ।
द्विण नागवृन्दं हतवीर्य्य सम्पत्
गन्तव्यता मूढ़तयावतस्थे ॥ 47
V. 48 illegible
बाणासनं विभ्रति यत्र युद्धे
शुद्धे शरत्काल इवाभिदृष्टे ।
इतस्ततो लीन तयाशु मोद्या
मेधा इवासन् लघवो नरेन्द्राः ॥ 49
V. 50 illegible
सत्ये विमूढ़स्य पतङ्गसाम्यं
समेत्य सानन्द इवारिवर्ग्गः ।
यद्वा हुदण्डारणिजञ्चलन्त-
न्तेजोऽनलं यद्विपदेऽभिषेदे ॥ 51
V. 52 illegible

निजासन प्राप्य रिपून्निरस्य
रुद्धा मरूद्वर्त्म मनोरयञ्च ।
विजित्य यस्याभ्यसतोऽवतस्थे-
प्यतन्द्र..........................।। 53
टण 54 पससमहपइसम
शिलामुखा मूर्द्धनि चापमुक्ता
झाङ्काररम्या द्विषतां निपेतुः ।
स्वस् सुन्दरी हस्तलताविमुक्त-
मन्दारगन्धानुगतास्तु यस्य ।। 55

....

....

....

चकर्त भूभृन्निवहोत्त्माङ्गम् ।। 56
शस्त्रब्रणास्त्रस्त्रुतिधार याद्रौ
रुद्धोप्यरीन्द्रर्युधि यो दिदीपे ।
द्वित् छाययाच्छादित एव भानु-
र्बिभ्रतनुत्रन्त्यजति स्वद्वीप्तिम् ।। 57

....

....

..........दुर्व्वार्य्य विकीर्ण्ण कीर्त्ति-
र्दशाननन्दुहृदमुन्निनाय ।। 58
न स्वीचिकीर्षुर्युधि चक्रिचक्रं
बज्रज्य नो बज्रभृतोऽपि जिष्णुः ।
यश् शक्तियुक्तो नु महेश्वरास्त्रं
सुदुस्सह्यं प्राप्य जितारिवर्ग्गः ।। 59

....

....

.........तन् त्वस्य विलासिनीनाम्
अभिद्यताराद्धृदयं स्वयञ्च ।। 60

योे मथ्यमानस् समरेऽरिवीरै-
र्गाम्भीर्य्ययोगान्न जहौ प्रसादम् ।
ह्रदो हि कालुष्यमुपैति भोगात्
स्तम्बेरमैरम्बुनिधिर्न्न जातु ॥ 61

....

....

विदिद्युते विद्युदिव स्फुरन्त्य-
जिह्वापि जिह्वेव भुजोरगस्य ॥ 62
स्निग्धासिपात प्रतिघातहाने
मुष्टेर्ल्लद्युत्वात् स्मृति विभ्रमाद्वा ।
पुनः प्रहारेण कृतेऽरिपाते
भुजापवादं बुभुजे भृशं यः ॥ 63

....

....

दिव्याङ्गनानामवतारणार्थं
सौपान सम्पत्तिमिवाकरोद् यः ॥ 64
रन्ध्रेऽभियोगं निजपक्षरक्षां
विभज्य यो दूषणसाधनाभ्याम् ।
हृतोत्तर प्राक्रममाततान
कुर्व्वन् पटुन्निष्प्रतिभ विपक्षम् ॥ 65

....

.................ततया फलत्वम् ।
विधेर्विद्येये विपरीत वृत्ते-
र्वृत्तं कृती योऽनुचकार युद्धे ॥ 66
संख्यानुनीतापि सदाभिमुख्ये
प्रागल्भ्यमिच्छत्यपि शत्रुसेना ।
पराङ्मुखी वीक्ष्य बभूव दूरा-
द्वधूर्न्नवोदेव समिद्रतौ यम् ॥ 67

....

शिलष्टे महाजौ विजयक्रियाञ्च ।
नापार्थको विक्रमसम्पदेति
यो युक्तमुक्तः खलु युक्ति विद्भिः ॥ 68
दुर्गाभिसंपर्क विवर्णदेहो
गुहान नालोचन लोल दृष्टिः ।
यस्यारिसंधो मृगकृत्तिवासा
वने स्थितः स्थाणुसमोऽत्यनीशः ॥ 69
...........................वरस्य
मनोरथो यस्य वृथा बभूव ।
नोर्व्वी यदुर्व्वीविजिगीषुतायां
वदन्यतायामपि नालमर्ची ॥ 70
प्रेङ्खत् प्ररूढ़स्फुट विद्रुमौधो
हरेस् समाक्रान्तिनिमग्न नागः ।
अन्तर्व्वनदुर्ग्गतयाब्धि तुल्यो
यस्यारिदेशोऽपि जहाति लक्ष्मीम् ॥ 71
.....................र्थसिद्धि -
मुद्योग युक्त स्त्रिगणस्य वृद्धैय ।
दिशश्चतस्त्रो विदितप्रयामा
जग्राह विद्या इव वालभावे ॥ 72
कृतावकाशं भुवने विभुत्वा-
दस्पृष्टमन्यैर्गुणिभिर्महीयः ।
संव्यश्नुते शब्द गुणानुबंधम्
यशो यदीयं खमिवाकलङ्कम् ॥ 73
..................क्षय कर्शिताङ्गी
प्राक् सुश्रुताचार विचारणाभिः ।
निः शेष दोष क्षपणेऽति दक्षा
यष् षड्रसाङ्गैर्धरणीं पुपोष ॥ 74
तदेव तेजो विजितान्यतेजः
पूर्व्वं महन्मण्डलमेव तच्च ।

भृशन्दिदीपे महदाधिपत्यं
यः प्राप्य भास्वानिव मध्यमह्नः ॥ 75
.........नाद्रीन्द्र मुदीर्ण्णसिंहं
यत्राधिरूढ़े सति तीव्रधाम्नि ।
न तारकाः केवल मस्तभासो
पतन्नृपाणां मणिमौलयोऽपि ॥ 76
एकत्र शुभ्रेऽपि शशाङ्कशोभे
समुद्धृते यस्य महातपत्रे ।
महीमशेषां प्रविहाय तापस्
समाससाद द्विषतां मनांसि ॥ 77
चिराय यद्रूपनिरूपणेच्छा
सञ्चोदिता नूनमशेष लोकाः ।
मत्स्यैरसंख्यैर निमेषभूयं
भूयोऽभ्यवाञ्छन् निजवाञ्छिताप्त्यै ॥ 78
लक्ष्मीन्दिदृक्षुः सहजां सुदृत्सु
यथाक्रमं स क्रमयाञ्चकार ।
सदर्प्पणां यो मणिदर्प्पणेषु
च्छायामिव स्वां परिभुक्तमूषः ॥ 79
यस्यातितेजिष्ठ तयास नीति-
र्न्नितान्तमृज्वी न यथा परेषाम् ।
मुक्तवाक्र्कचन्द्रौ न गतिर्ग्रहाणां
प्रतीपवक्रान्यतमस्य कस्य ॥ 80
सन्मन्त्र मूलैश्च तुरश्चतुर्मिस्
सामादिभिर्य्यो विविध प्रयोगैः ।
अपाय संरोधिभिरभ्युपायै
र्वेदैश्च संसाधयतिस्म सिद्धिम् ॥ 81
सदापि मूल प्रकृतिः प्रतीत-
श्चित्रं महत् कर्म्म च दर्शयन् यः
षाड्गुण्ययोगात् त्रिगुणं प्रधाने-

मतुल्यमाचष्ट विनापि वाचा ॥ 82
प्रायेण जिह्वोऽपि विधिर्व्विधेये
मन्त्र प्रभूत्सारु विशेषशक्तीः ।
अपाय दृष्टेः प्रतिकूलपक्षे-
ऽनुकूलयामास भियेव यस्य ॥ 83
त्रिवर्ग्ग संसर्ग्ग सुहृद्भिरारा-
द्राष्ट्रे गुणौधैरव भर्त्स्यमानाः ।
दोषा रूषेवाशु विपक्ष पक्ष-
मशिश्रियन् यस्य गुणाश्रयस्य ॥ 84
निर्म्मिद्य सद्यः स्वमवद्यनुद्यन्
यो न्यायिनोऽन्यान् विनिनाय युक्तया ।
तभांस्यापि घ्नन् सकलं कलङ्क-
मुपेक्षते स्वं क्षणदाकरो हि ॥ 85
सुशासनादव्यसनाच्च यस्य
प्रजासु जाता न विपत्तिशङ्का ।
अजातशत्रोरपि राजपुत्री
दुश्शासनात् प्राप परां पुरार्त्तिम् ॥ 86
छिदप्रतीक्षा प्रशभात्तशीलास्
सुदुर्द्धराः खण्डितधाममिश्च ।
यं पार्थिवं पात्रमवाप्य लक्ष्म्यस्
स्थेष्ठा इवापस् सुविदग्धमासन् ॥ 87
यश् शक्तिसिंहीं परितश्चरन्तीं
विद्राण्यहिंस्त्रामरिवर्ग्गमार्गे ।
वृषेण योगादुदित प्रजां तां
पुपोष लक्ष्मीं महिषीमवाप्य ॥ 88
अजीगणत् सूरिगणोऽतिराज्ञां
सहस्त्रदोषं धुरि कार्त्तवीर्य्यम् ।
यदा तदा सर्व्वगुणैरनूने
नूनं कथा का पुनरेव यस्मिन् ॥ 89

दिवः पृथिव्योरपि गीयमान-
ञ्जिष्वोर्य शोप्यर्ज्जित वीर्य्यसम्पत् ।
कर्ण्णासुखं श्रोतसुखस्य शङ्के
यस्योपमार्हं यशसो न जातम् ॥ 90
आक्रान्त दिग्व्योम्नि पयोमुचीव
प्रगर्ज्जिते यस्य यशस्यनात्तम् ।
न केवलं रत्नमुपायनन्द्राक
प्रादाद्र गजौधञ्च विदूरभूमिः ॥ 91
लक्षाद्धरोत्थैः स्थगयद्भिराशा
धूमैर्निरूद्धवार्क कराकरैर्य्यः ।
दिवञ्च शातक्रतवीञ्च कीर्त्ति
मलीमसत्वं युगपन्निनाय ॥ 92
यद्धर्मसन्दर्शनतोऽनुमान-
मग्नैस्त देवाव्यभिचारभुक्तम् ।
नवन्तु तद् यन्मखधूमदृष्टौ
बृष्टेर्ष सूनामनुमानमेव ॥ 93
स्वयं प्रपन्नाभिरयाचमानं
पूर्णं सुसम्पद्भिरिवाद्भिरब्धिम् ।
रिक्तोऽपि यं प्राप्य यथेष्ट पूर्ण्णः
पुनर्व्ववर्षाभ्र इवार्थिसार्थः ॥ 94
चक्षुर्मनोहार्य्यपि दर्शयच्च
कराग्र शोभाभापि सद्रसार्द्रम् ।
यस्येन्दुबिम्बं शुभरङ्गवृते-
नृत्तोपमार्हन्न कुरङ्गदुष्टम् ॥ 95
छायाश्रितोऽप्यन्यनृपो विजेतुं
दृप्तद्विषोऽलं किमुत स्वयं यः ।
आस्तां रविः संक्रमितोरूतेजा-
श्चन्द्रो न किं सन्तमसान्युदस्येत् ॥ 96
सन्दर्शयामास तथान्यभूषा

न भूरिशोभां मणिदर्पणञ्च ।
राज्ञां यथाज्ञा निजकर्ण्णपूरी
कृता यदीया नखदर्पण श्रीः ॥ 97
अन्योपि सन् केनचिदेव तुल्यो
गुणेन नो यन्महिमानमाप ।
नृत्तव्रतो याति हि नीलकण्ठो
न तावतैवेश्वरतां मयूरः ॥ 98
सदागतिः स्नेहकरी विभुत्वं
बिभ्रत्यदभं दधती प्रकाशम् ।
पृथ्वी यदीया रचनाञ्जगत्सु
धत्ते महाभूतमयीव कीर्त्तिः ॥ 99
वदन्यताशौर्य्यवपुर्व्विलास-
गाम्भीर्य्य माधुर्य्यदयादयो ये ।
तेषामिवैको निलयः प्रयत्न-
धियाधिको यो विदधे विधात्रा ॥ 100
प्रतीतवीर्य्यो भुवि कार्त्तवीर्य्यो
वीर्य्यं यदीयं द्विभुजोर्ज्जितं प्राक् ।
वीक्षेत चेदात्मभराय जन्ये
मन्येत मन्ये स्वसहस्रहस्तान् ॥ 101
दूरात् प्रतापैर्द्विषतां विजेतु-
र्यस्य स्वयुद्धन्नित रान्दुरापम् ।
गन्धद्विपस्येव मदोत्कटस्य
वित्रासितान्यद्विरदस्य गन्धैः ॥ 102
विहाय सङ्गं परदेवतासु
श्रद्धा च भक्तिश्च परा यदीया ।
श्रीकण्ठमुत्कण्ठतया प्रपन्ने
गङ्गाभवान्याविव देवदेवम् ॥ 103
सौन्दर्य्यसर्ग्ग..........विधाता.... ।
जातरूपमयस्तम्भं यमेकं भुव... ॥ 104

इत्थं कृत्तो मया कामो दग्धः किल पिनाकिना ।
इतीवेश्वरतान् नीतो विद्यान्ना षोडति सुन्दरः ॥ 105
............विद्या.......................।
..................चतुरास्य प्रजापतिम् ॥ 106
लक्ष्मीं वक्षस्स्थले क्षिप्त्वा कीर्त्तिम्पारेपयोनिधेः ।
विद्यया कामतो रेभे वृद्धयैव युवापि यः ॥ 107
जुगोप गां वशिष्ठस्य दिलीपः प्राक् प्रजेच्छया ।
लब्ध्वा प्रजास् स्ववीर्य्येण भार्गवीयस्......॥ 108
भुवनाप्लावनोद्वेले यत्कीर्त्ति क्षीरसागरे ।
छायाव्याजेन भूर्भीत्या नूनमिन्दु मुपाश्रिता ॥ 109
सहस्रभोग भरितो व ....भवोऽपि यः ।
अनन्त गुणयुक्तोऽपि विनतार्त्तिहितो भृशम् ॥ 110
उर्व्वीमावृण्व ताम्भोद्यिमेखलाभोग मण्डिताम् ।
एकच्छत्रेण महता मेरूर्येन वृथाकृतः ॥ 111
कलिकण्टक सम्पर्कादास्खलन् पादहानितः।
धर्म्मः कृतार्थतारस्तु यं समागम्य सुस्थितः ॥ 112
यस्या वीर्य्यानिलोद्धतो धामधूम ध्वजो युधि ।
द्विड्बधूनां विधूमोऽपि वास्पद्यारमवर्द्धयत् ॥ 113
अचिरमानिमारिश्रीः स्थेयस्या......द्यमाश्रिता ।
गुणानुबन्धबद्धापि कीर्ति..........प्रदिगद्गुता ॥ 114
रूढ़ः श्रीनन्दने यस्य रणे रक्तासिपल्लवः ।
बाहुकल्पद्रुमो दिक्षु यशः पुष्पमवाकिरत् ॥ 115
यद्याने दृप्त दन्तीन्द्र दन्तनिर्घात ताड़िता ।
रूषेवोर्व्वी महासत्वान् रजसातन्द्रमावृणोत् ॥ 116
समदिद्धे कृपाणाग्नौ मन्त्रसाधनबृंहितः ।
हत्वारिवक्त्र पद्मानि यस् साम्राज्यमजीजनत् ॥ 117
दृढ़ोऽप्यद्यृष्यसत्वोऽपि तुङ्गोऽप्युन्मूलिते....।
मथनेऽनन्तवीर्य्येण यो न भूभृत्कुलोद्रतः ॥ 118
तृषितेव द्विषां लक्ष्मीः प्लुष्टा तेजोग्निनाभृशम् ।

यस्य पुष्करजां धारां प्राप्य चिक्षेप न तत् क्षणम् ॥ 119
पादाम्बुज रजो यस्य चरितानुकृतेरिव ।
.......भूमृद्वराङ्गेषु पदं दत्वा श्रियन्दद्यौ ॥ 120
निद्राविद्राणदक् स्त्रीवज्जढरेणावहत् प्रजाः ।
हरिर्य्यस्तु हृदैवेशः सुवोधस्फुट पौरुषः ॥ 121
हप्तारीन्द्रं विजित्याजौ योऽनुजग्राह तत्कुलम् ।
.......................र्भिन्नेभेन्द्रो मृगाधिपः ॥ 122
निस्त्रिंशबल्लभं बद्धा गुणयुक्तैस्तु मार्ग्गणैः ।
ऋजुभिर्य्यो विजित्यारीन् भेजेऽर्थान् सद्गुणैरिव ॥ 123
निपीतन्नीलकण्ठेन कण्ठालङ्कृतये विषम् ।
विबुधानां.........र्थन्तु..........द्वान्तं वचोमृतम् ॥ 124
सान्द्रैर्य्यस्याध्वरे द्यूमैरूद्ध्वंगैरूद्धदृष्टिभिः ।
वृद्धोऽद्युनापि दिग्भ्रान्तैस् स्वद्युर्य्यैर्भ्राम्यति ध्रुवम् ॥ 125
सः य......धाम यो द्विट्समिद्भिस् समिन्मखे ।
अक्षीणान्दक्षिणां कीर्त्तिं दिग्द्विजेभ्यस् समादिशत् ॥ 126
द्विषताभ्यस्तशस्त्राणां प्रणामशिथिली कृते ।
चापस्यैव गुणे यस्य विरतिर्न तु धन्विनाम् ॥ 127
सुवृत्तोऽपि सुहृद्धद्यो भुजो यस्य महीभुजः ।
दुर्हृदाम् सुहृ(दाञ्चैव) प्रतीत सर्व्वदा रणे ॥ 128
एकद्रव्याश्रितं भावं ज्ञात्वा द्विङ्जातिभावितं ।
कर्म्मुकेषूचितङ्कर्म्म सविशेषं व्यधत्त यः ॥ 129
शूलिनाध्यासितां भक्तिगम्भीरां यस्य दद् गुहाम् ।
तन्नेत्रानलभीत्येव विविशुर्नान्य देवताः ॥ 130
रामाणां हृदयारामे तिष्ठन्तं कामतस्करम् ।
प्रजिहीर्षुरिवाश्रान्तो यो विवेश मुहुर्मुहुः ॥ 131
योगोद्यतोपि यः शान्तौ नाम्नैव द्विङ्भयङ्करः ।
दूराद्धिराजसिंहस्य गन्धं घ्रात्वा द्विपा द्रुताः ॥ 132
मन्त्रवीर्य्य प्रयोगाद्यं प्रप्यानन्यवरेव यम् ।
कृतार्था कामदा पृथ्वी करजामर्द्दमार्द्दवात् ॥ 133

युक्तिरेतावता व्यक्ता कान्तिरत्नेऽपि दर्शिते ।
यज्जगच्चित्तसर्व्वस्वमाहृतं येन सर्व्वदा ॥ 134
न्यस्तशस्त्रो वने सुप्तो हरिर्य्योगपरोऽप्यजः ।
कान्तार्द्धशद्यरो रुद्रो यज्जिगीषुं स्मरन्निव ॥ 135
स्फुटसीन्दीवरस्त्रस्त रक्तमद्ध्वासवेच्छया।
द्विट्छ्रीर्भृङ्गवि बभ्राम यस्य द्रोभ्रदिसन्निधौ ॥ 136
नक्षत्र कुलसम्पन्नं भूतानामवकाशकृत् ।
व्योमेवारिपुरं यस्य शब्दमात्रेण लक्षितम् ॥ 137
शरकर्मकुलो यस्य वाहिनीदुर्ग्गसङ्गतः ।
वने खड्सहायोऽरिः संयत्संस्थइवद्गुतः ॥ 138
वैरिणो ध्यानानिरता वीतरागा गुहाशयाः ।
यस्येशस्यांघ्रियोगेन विना नालं विभुक्त्ये ॥ 139
क्वाहंभर्त्ता परित्यक्ता श्वापदैः स्थातुमुत्सहे ।
इतीवारिपुरी यस्य प्राविशद् दाव पावकम् ॥ 140
यस्य सत्ववतो वीर्य्यं रणे दृष्ट्वा द्विषद्गणः ।
सत्वेत्सयेव सिंहादियुक्तमन्ववसद्वनम् ॥ 141
मन्दोन्मत्तोऽपि तुङ्गोऽपि नियोज्यो धर्म्मसाधने ।
इतीमेन्द्रगणो येन द्विगेमीयोऽदायि भूरिशः ॥ 142
विभक्ति प्रकृतीनां यः सप्रधा विदद्यत् पदे ।
तद्धितार्थ परश्चासीदागमाख्यातकृत्यषित् ॥ 143
प्रतापानलसन्तप्ता शङ्के दाहाभिशङ्कया ।
आप्लाविता सकृद्धात्रीयेन दानाम्बुवृष्टिभिः ॥ 144
सुमनोहारिणी यस्य गुणैर्बद्धा विकासिनी ।
लोकत्रयश्रियाद्यापि कीर्त्तिमाला द्यृताधिकम् ॥ 145
यस्य सागरगम्भीरपरिखा भस्मसात्कृता ।
चम्पाधिराजनगरी वीरैराज्ञानुकारिभिः ॥ 146
विवर्ण्णौ चरणौ यस्य नृपमौलिमणित्विषा ।
सर्व्ववर्ण्णनुरक्तातु निर्म्मलोर्व्वी भुजोद्धृता ॥ 147
कलिरेकान्तवामोऽपि दक्षिणो यस्य शासने ।

द्रुतारीननुदुद्राव तेजोनल भयादिव ॥ 148
तथा नीरनिद्येर्य्येन क्षोणी निष्कण्टकीकृता ।
नाद्यापि स्खलिता कीर्त्तिर्यथैका सर्व्वतोगता ॥ 149
गुणेषु मुख्यया वृत्त्या गौप्या द्रव्येष्ववर्त्तत ।
गणनापि मतं यस्य काश्यपीयमनुज्झतः ॥ 150
यथाकामन् द्विषद्कामः क्व निलील्यो नु निर्भयम् ।
यद् यस्य याने धूलिभिः सान्धकारीकृता दिशः ॥ 151
प्राध्वं कृता सदा प्रेम्णा विदज्धधियमुत्सुका ।
न निरास्थत यज्जातु राजविद्या कुलाङ्गना ॥ 152
साक्षात् प्रजापतिर्दक्षो दक्षिणक्षणमक्षिणोत् ।
सकलं सकलङ्कं यः कलिदोषाकरं कृती ॥ 153
सदा कृते मखशते यस्तैर्द्धूमनीरदैः ।
शरद्यपि नभश्चक्रे प्रावृषीव मलीमसम् ॥ 154
परस्त्रीविमुखो योऽपि सदाचार विदक्षणः ।
केनाप्याजौ परश्रीणां पाणिग्रहविधिं व्यधात् ॥ 155
यस्येनस्यान्यतेजांसि तेजसा जयतोदये ।
नून मौर्व्वानलोऽधापि लीनो स्पर्द्धितयाम्बुधौ ॥ 156
बद्धा विद्यात्राहीन्द्रेण रिक्ता नूनमियन्धरा।
येन स्वकीर्त्तिरत्नेन पूरयित्वा वृषाङ्किता ॥ 157
भिन्नेभकुम्भनिर्म्मुक्ता मुक्ता येन रणाङ्गने ।
रेजिरे विद्यवारिश्रीवाष्पानामिव विन्दवः ॥ 158
कीर्त्ति नादाम्बुदध्वान........................।
.....न् त्रिभुवन क्षेत्रे धर्म्मबीजमबर्द्धयन् ॥ 159
सिंहेन नोपमानार्हो यस्य शौर्य्येण संयुगे ।
तथा हि यद्भियारातिरध्यशेत गुहां हरेः ॥ 160
वानी राजीव राजांश.......................।
......सरोजानि निर्य्यान्ति मुखमण्डलात् ॥ 161
............................तेजोनल सङ्गता ।
कलिं न्यक्कुर्व्वती यस्य राज्यश्रीर्दभयन्त्यमृत् ॥ 162

यशोविस्तार संक्षिप्ता क्षितिर्यस्य..........।
....॥ 163
........................यमेक मति तेजसम् ।
नूनमुल्लेखितस्त्वष्ट्रा भ्रमि मारोप्यभास्करः ॥ 164
योग्यं वरं यमासाध मर्त्त्यलोके...........।
....॥ 165
तारयित्री तितीर्पूणी गम्भीरापन्महानदीम् ।
वेदव्यासन्न सुषुवे यस्य वाक् सत्यवत्यपि ॥ 166
ऋजवो गुणसम्पर्क्कादापदां प्रतिद्या(तकाः) ।
....॥ 167
जीर्ण्णाहीन्द्रेण विद्यृता साचलेयञ्चलोदिति ।
यूनि नूनं न्यद्याद् वेद्या यत्राहीने वसुन्धराम् ॥ 168
विभूतिर्भूतपूर्व्वापि राज्ञाञ्च गुणसंहतिः ।
....॥ 169
संभृताः क्ष्माभृतां लक्ष्मीरावाल्यात् कन्यका इव ।
यथाकालमुपायैर्यो निरुपायैरूपायत ॥ 170
शब्दशास्त्रेऽप्यधीनी यो विना द्विर्व्वचनंगुरोः ।
....॥ 171
यस्योपमानं सञ्जातन्न किञ्चिद् गुणविस्तरैः ।
बुद्ध्वा बौद्धं मतं मनेऽन्यतीर्थैरपि नान्यथा ॥ 172
कालदोषाम्बुद्यौ मग्ना दुर्गे गम्भीरभीषणे ।
....॥ 173
शुभं शुभंयुना यूना मनुवर्त्यानुवर्त्तिना ।
रसायनं विना भावि येन वर्षीयसाजरम् ॥ 174
विष्वग् विकीर्ण्णैर्य्युगपद् यस्य तेजोभिरुज्ज्वलैः ।
....॥ 175
राज्ञां कृत्यमिति ज्ञात्वा यस्य दुर्ग्गसमाश्रयः ।
न दानवभयादब्धिमद्यि शेते रिपुर्म्मद्योः॥ 176
अपि कामादयो दोषाः स्थाने येन नियोजिताः ।

गु..॥ 177
मनीषिभिर्म्भनोहव्य पिबद्भिश्चरितामृतम् ।
अतिपानादिवोद्गीर्ण्णं यस्य काव्यैर्न्निजैः सह ॥ 178
दोषान्धकार बहुलञ्जगज्जातं यथा यथा ।
मस्य...॥ 179
धर्म्मेण संस्तुतानां यो निषिद्ध्यजगतामपि ।
विनाशहेतुन्नातस्थे क्षणभङ्गप्रसङ्गिताम् ॥ 180
अनेकक्रतुरप्युच्चैः पदो गोचतिरप्यगात् ।
अक्रोधनस्य...॥ 181
भृगुमात्रमपि प्राप्य वह्नेः प्रतिहतं पुरा ।
तेजस्त्वधाक्षदि यस्यापि महान्तं वाहिनीपतिम् ॥ 182
वदन्य स्वश्रियञ्चक्रे सुहृत् साधारणीं हरिम् ।
वक्षोनिक्षिप्तलक्ष्मी...................................॥ 183
तर्षो हर्षेण संप्राप्य व्यनीयत वनीयकः ।
यं महान्तं हृदमिव प्रसन्नं स्फुट पुष्टरम् ॥ 184
असूर्य्यम्पश्यम सुहृत्स्त्रीव क्त्र कुमुदाकरम् ।
उच्चैः सङ्कोचयामास...................................॥ 185
पतच्छिली मुखच्छायच्छन्नद्विङ्वदनाम्बुजे ।
रराज राजहंसो यश्चरन् रणमहाहृदे॥ 186
सम्मुखीनो रणमुखे यस्य नासीदसीदतः ।
प्रेङ्खत्स्व खड्गसंक्रान्तं प्र................॥ 187
धनुर्द्दर्शनमात्रेण तीर्थध्वङ्क्षा द्विवो द्रुताः ।
कामं पुरो न यस्याजौ भुजङ्गारिरपि स्थितः ॥ 188
साल काननरम्यां यः स्फुट पुष्पशिलीमुखाम् ।
दुतेभ्यः पटवीं द्विङ्भ्यो योद्धृद्भ्यो.........॥ 189
प्रोल्लसत्कीचकशता कङ्कादिभिरूपाश्रिता ।
शून्याप्यरिपुरी येन विराटनगरी कृता ॥ 190
केवलं राजनागानां वीर्य्यं मंत्र इवाहरत् ।
यो नाद्यूनतया प्राणान् क्षिपन् ताक्ष्यं इव...॥ 191

दृष्ट्वा यस्याध्वरं शक्रयशोविभ्रंशशङ्कया ।
धूमस्पर्शच्छलान् नूनमुदश्रुनयना शची ॥ 192
रूद्धान्यतेजसो यस्य पादच्छायामशिश्रियन् ।
मेरोरिवेलापतयः सितच्छात्रत्यजोऽनिशम् ॥ 193
सृष्टौ चन्द्राक्कर्योर्ध्यानाताना दरादिव भिन्नयोः ।
यमेकं तपनाह्लादसमर्थमसमं व्यद्यात् ॥ 194
उपान्तसेवां वाञ्छन्त्यो यत्पादन्तीव्रतेजसम् ।
मौलिरत्नप्रभाम्भोभिरसिञ्चन् भूपपंक्तयः ॥ 195
नवं प्रियमहो लोके यद्विहाय धनुस् स्मरः ।
उन्ममाथाङ्गनाचित्तं यत्कान्त्यानुपमानया ॥ 196
स्फुटाष्टदिक् प्रान्तदले हेमशैलोरूकीर्ण्णके ।
यशो गन्धायते यस्य भुवनैकसरोरुहे ॥ 197
उद्वान्तरागः स्फुरितायस्याङ्घ्रि नखरश्मयः ।
अस्पर्द्धन्त नतोर्व्वीन्द्रमौलीरत्नमरीचिभिः ॥ 198
अन्वरूद्ध्यत यस्याज्ञां फलंप्रसव सम्पदे ।
आजन्म बन्ध्यश्चतोपि वशिष्ठस्य दिलीपवत् ॥ 199
सहस्रमुख संकीर्त्त्यें गम्भीरं गुणविस्तरं ।
यस्य भाष्यमिव प्राप्य व्याख्याखिन्नापिधीमताम् ॥ 200
श्रीमत् सिद्धेश्वरं लिङ्गं शिवपुरे गिरौ ।
वर्द्धयामास यो भोगैरपूर्व्वैः शिबिका दिभिः ॥ 201
तत्रापि लिङ्गं शर्व्वस्य शर्व्वाणी प्रतिमे शुभे ।
यः सम्यक् स्थापयामास पितृणां धर्म्मवृद्धये ॥ 202
यदुपक्रममासेव श्रीभद्रेश्वर शूलिनः ।
भोगोऽन्यत्रापि देवान् यः पूजाभिरूद्रमीमिलत् ॥ 203
विबृद्धिं धर्म्मसिन्धूनां श्रीन्द्रवर्म्मादिभूभृताम् ।
स्वमण्डलस्य च समं यश्चक्रे नृपचन्द्रमाः ॥ 204
यशोधरतटाकस्य दक्षिणेनापि दक्षिणः ।
यः शौरिगौरीशनिभाः शम्भोर्ल्लिङ्गमतिष्ठिपत् ॥ 205
स सोमवंशाम्बर भास्करश् श्री-

राजेन्द्रवर्म्मा तदिदं नृपेन्द्रः ।
स्वर्ग्गापवर्ग्गाद्यिगमस्य लिङ्गं
लिङ्गं प्रतिष्ठापितवान् स्मरारेः ॥ 206
संप्राप्तयोः प्राप्तयशास् स्वपित्रो-
र्भुवः पतिस् सोऽपि भवोद्भवेन ।
संस्थानतां स्थापितवान् स्थितिज्ञो
निभे इमे द्वे शिवयोश् शिवाय ॥ 207
महाभुजस् सोऽपि चतुर्भुजस्य
निमामिमाम्बुज जन्मनश्च ।
अतिष्ठिपन्निष्ठित राजकृत्यो
लिङ्गान्यथाष्यवपि चाष्टमूर्त्तेः ॥ 208
रत्नोल्लसद्भोग सहस्रदीप्तं
स चाप्यहीनं द्रविणस्य राशिम् ।
अशेषमप्येष्वदितेव शेषम्
देवेषु देवेन्द्र समान वीर्य्यः ॥ 209
स कल्पयामास महेन्द्रकल्पस्
सदा सदाचारविधिं विधेयम् ।
शैवश्रुतिस्मृत्युदितां सपर्य्यां
पर्य्याप्त मासा मिह देवातानाम् ॥ 210
स चापि बाचस्पति धीस् सुधीर-
न्धर्म्मानुगं धर्म्मभृतां पुरोगः ।
तान् भाविनो भावितराजधर्म्मा-
निदं वचोऽवोचत् कम्बुजेन्द्रान् ॥ 211
रक्ष्यस्य संरक्षणं..........यत्
स क्षत्रधर्म्मो विदितो यदा वः ।
पुण्यन्तदेदत् परिरक्षतेति
विज्ञापना साधयतीव सिद्धम् ॥ 212
धर्म्मो युगेऽस्मिन् स्थिरमेकपात् स
कथं समस्थास्यत सुस्थितोऽयं ।

भवादृशां शास्त्रदृशां स नो चेन्
महाभुजस्तन्नमुयाश्रयिष्यत् ।। 213
धर्म्मापदस् साधु..............कापि
लज्जेत कर्त्ता किमुत्त स्वयज्ज ।
रक्षाधिकारी नृपतिर्व्विशेषाद्
इति प्रतीतं भवतामिदन्तत् ।। 214
सन्तो यशोधर्म्मधना न बाह्यं
धनं धनायेयुरिहात्मनोऽपि ।
प्रागेव देवादिधनं सतां वो
विनिश्चयो यं ननु बद्धमूलः ।। 215
तथापि भूय..........यामि युष्मां
स्तदक्षतं रक्षत पुण्यमेमत् ।
मा हार्ष्ट देव स्वमिति प्रकाशं
न धर्म्महेतोः पुनरुक्तदोषः ।। 216
अभ्यर्थितोऽसूनपि संप्रयच्छेन्
महान्महिम्ना किमुत स्वकृत्यम् ।
अतश्च विश्रम्मबल प्रगल्भा
वाक् प्रार्थनाभङ्गभयोज्झितैषा ।। 217
शाकाब्दे गणयमाने कृतनगवसुभिर्माघमासस्य पुण्ये
शुक्लस्यैकादशाहे निमिषमपि भवे याति वर्षार्द्धमिन्दौ ।
अर्च्चाभिश् शौरिगौरीगिरिशकजभुवां सार्द्धमर्द्धेन्दुमौलेश्
श्रीराजेन्द्रश्वराख्यं स्थितिमकृत परां लिङ्गमत्रेदमाभिः ।। 218

अर्थ–

सत्त्व, रज, तम– इन तीनों गुणों के स्वामी, अग्नि, चन्द्रमा और सूर्य की किरणों को प्रकाश प्रदान करनेवाले, वेदों से वंदित, सृष्टि स्थिति विनाश रूप अपने खेल के लिए सृष्ट्यादि काल में ब्रह्मा, विष्णु, महेश– इन तीन भिन्न शक्तिवान् रूपों में भासने पर भी जो सदा एक रूप में रहते हैं, उन नित्य चेतन श्री शिव जी को राजा के वैभव प्राप्ति के लिए नमस्कार करता हूँ ।। 1

जिसका रूप नये चन्द्रमा के समान शुभ्र है, वेदों द्वारा जो सर्वश्रेष्ठ रूप में वर्णित है, संसार जिससे व्यक्त होता है, तीनों गुणों के द्वारा ब्रह्मा, विष्णु, शिव– इन तीन भिन्न रूपों में जो अवतार ग्रहण करते हैं, जिन्हें मुनिगण साक्षात् अविनाशी बतलाते हैं, उन योग गम्य ॐकारस्वरूप भगवान् शिव जी को कार्यसिद्धि के लिए नमस्कार करता हूँ। वे हमलोगों पर कृपा करें ।। 2

जो हंसगामिनी, उन्मादक सौन्दर्यवाली पहले सती रूप में थीं, जो अपने शरीर को छोड़कर चली गयीं तथा पुनः शिवजी के प्रेम को पाने के लिए नवीन जन्म धारण की थीं। वह मानसरोवर में उत्पन्न कमलों को स्वेच्छा से उखाड़कर धारण करनेवाली तथा शिवजी के शरीर से सुख पानेवाली पराशक्ति गौरी हमारी रक्षा करें ।। 3

जगत् के जिस सर्वोच्च कारण के द्वारा अपने यज्ञ, अग्नि, सूर्य, वायु, आकाश, पृथिवी, जल और चन्द्रमा– इन आठ रूपों से जगत् में विस्तार लाया जाता है, जो जगत् के कारणरूप अप्रतिहत शक्तिवाले हैं तथा जो वेदों के द्वारा अविनाशी बताये जाते हैं, उन कारणों के भी कारण भगवान् अर्द्धचन्द्र चूड़ामणि शिवजी की जयकार हो ।। 4

श्री नारायण को नमस्कार करें जो विभुत्व प्रदर्शन मात्र के लिए केवल तीन ही पगों से तीनों लोकों को लाँघ गये हैं और अब मानो चतुर्थ पद (अन्तिम पद या वैकुण्ठ) को पाने की इच्छा से सोने का बहाना बनाकर क्षीरसागर में समाधि लगाये बैठे हैं ।। 5

उन ब्रह्माजी की जय हो जिन्होंने चारों मुखों से मेघगर्जन के समान गम्भीर नाद से ॐकार का उच्चारण किया है तथा तीनों लोकों की सृष्टि की पूर्णता के लिए किसान की तरह फूली (ऊपर निकली) हुई पृथिवी में अपने आद्य बीज को बोया है ।। 6

चन्द्रमण्डल से निकली हुई जलधारा रूप गंगाजी की जय है जिन्हें घनी जटाओंवाले शिवजी के द्वारा उत्तम प्रेम सम्बन्ध प्रदर्शन के लिए पार्वती जिनके आधे भाग में है– ऐसे शरीर के मस्तक पर धारण किये हैं ।। 7

आसमुद्र पृथिवी के राजाओं के मुकुटमणियों की मालाओं से पूजित

चरणवाला, शत्रु कुल कमल के सुखनाशक चन्द्रमा के समान जो था वह कौण्डिन्य-सोमा वंश गगनतल का तिलक अनिन्दितपुर के शासन दण्ड एवं पूर्ण लक्ष्मी का वाहक बालादित्य नामक राजा था ।। 8

रण में गर्वीले शत्रुओं की वधुओं को वैधव्य दीक्षा ग्रहण करवाता हुआ जिसने शिशिर चन्द्र की फैली हुई चन्द्रिका के समान अपने गुणों की कीर्ति की माला गुँथवाया, उसी राजा ने सम्पत्ति में स्वर्ग से होड़ लेनेवाले स्वर्गद्वार पुर में विभव और विधान के साथ शिवलिंग की स्थापना की ।। 9

ब्राह्मण, क्षत्रिय सम्मिलित कुल को अभिवृद्धि देनेवाली उसकी विख्यात जगत् पावनी, सती भगिनी पुत्री जो 'सरस्वती'– इस पवित्र नाम को धारण करती थी, वह अनेक गम्भीर वेदवाणी को धारण करनेवाले विश्वरूप नामक पति को ठीक वैसे ही प्राप्त हुई जैसे नदियाँ समुद्र को प्राप्त होती हैं ।। 10

विष्णु, शिव और रुद्र-जैसे श्रेष्ठ देवताओं की प्रसन्नता के लिए स्वर्ग में बहुत काल व्यतीत करने के बाद सोम जिसका आदिपुरुष है तथा यश रूप पारिजात जिसमें निस्सृत है, उस वंशरूपी क्षीरसागर की जगत् कल्याणकारिणी दूसरी लक्ष्मी की तरह ही जिसने पवित्र जन्म को प्राप्त किया है ।। 11

जो नाम से भी महेन्द्र देवी नाम की राजा की बेटी ईश्वरी ही देवी सुन्दरी विलासिनी जनों से बहुधा जिसकी स्तुति के ज्ञान होते रहे, तेजस्वी वंश की.......... पुर के अधीश राजा के पुत्र ने जिसे प्राप्त कर महेन्द्रवर्मन राजा ने ईशत्व को सार्थक किया था (जिसकी अर्द्धांगिनी लक्ष्मी-सी हुई उसका ईश्वरत्व सार्थक था)।। 12

तीक्ष्णतर किरणोंवाले सूर्य से भी अधिक तेज को धारण करते हुए, रात्रि के अन्धकार को नष्ट करनेवाले सूर्य को, दोष अन्धकार को नष्ट कर नीचा दिखाते हुए जिसने उग्र तप के द्वारा पद्मानुबन्ध प्रकट किया था– उस प्रजानाथ सम्राट् (महेन्द्रवर्मन) के द्वारा देवी (महेन्द्र देवी) में तेजों की खान राजेन्द्रवर्मन उत्पन्न हुआ ठीक वैसे ही जैसे कश्यप के द्वारा अदिति से तेजों की खान सूर्य उत्पन्न हुआ था ।। 13

पृथिवी के सारे राजाओं को पराजितकर बाँध लेनेवाले (राजेन्द्रवर्मन)

का क्षीरसागर से चन्द्रमा की तरह तथा सूर्य से चित्रभानु की तरह अत्यन्त शुद्ध वंश परम्परा में पवित्र जन्म हुआ ।। 14

तेज का प्रकाशन, अन्धकार का विनाश, दिशाओं की प्रसन्नता तथा किरणों का प्रसारण– ये सारे कार्य जो सूर्य और चन्द्रमा के हैं, वे उसके जन्म के कारण सम्पादित हो गये । अर्थात् उसके जन्म के कारण अन्धकार दूर हो गया था, प्रकाशक किरणें (आशा की लहर) फैल गई थीं तथा दिशाएँ प्रसन्नता से भर उठी थीं ।। 15

यथोचित सुन्दर होते हुए भी दिशाएँ सोमवंशी के जन्म के कारण निरन्तर प्रतीक्षा के महाफल रूप में उसे पाकर रमणीयता के करोड़ गुणा को पायें ।। 16

विशिष्ट सुन्दरता से जिसके शरीर का सौन्दर्य बढ़ रहा था सभी पक्षों में विकास पाते हुए उसने केवल एक ही पक्ष में विकास पानेवाले चन्द्रमा के सौन्दर्य का तिरस्कार किया (नीचा दिखाया) ।। 17

जो बचपन में ही अत्यन्त शीघ्रता से कलाओं से पूर्ण हो (कलाओं में दक्ष हो) दिन-रात सभी समय में स्तुतियों में या आकाश में चमक रहा था, उस सचेतन चन्द्र ने अचेतन चन्द्र को उसकी जड़ता के कारण नीचा दिखाया ।। 18

दोषों को दूरकर ज्ञान विस्तार करती हुई, विषयों को स्पष्ट करती हुई लोक में विविध उपभोगवाली सद्विद्या जिसके मुखाग्र में संगति पायी थी (वह) मानो अन्धकार को दूरकर प्रकाश को फैलानेवाली जगत् पदार्थों को प्रकाशित करनेवाली, संसार को ढँक लेनेवाली दिन के सूर्यप्रभा की तरह ही थी ।। 19

देवताओं द्वारा उपदिष्ट, ज्ञानमयी अमोघ् माहेश्वरी शक्ति को धारण कर कुमारावस्था में ही सारे शत्रु समूहों को जीतकर जिसने महेन्द्र (इन्द्र) की शोभा (सम्पत्ति) पायी थी ।। 20

महाराजा पृथु के समान विस्तृत गुण समूहों से तथा उत्तम क्षत्रिय कुलोत्पन्न के लिए उपयुक्त, युद्ध के लिए प्रधान (महत्त्वपूर्ण) महनीय धनुर्विद्या की शिक्षा के द्वारा जिसने ऊँचा नाम पाया था ।। 21

शिष्टजनों द्वारा उपदिष्ट (उपदेश किये गये) शस्त्रविद्या और शास्त्रविद्या

के बीजरूप ज्ञान को, आसानी से ग्रहण करनेवाली जिसकी उत्कृष्ट बुद्धि ने तुरन्त ग्रहणकर श्रद्धारूपी जल से सींचकर उत्तम रूप से संरक्षित किया था ।। 22

जो शोभा का सदा आधार था विशेष को छोड़ते हुए निरालस्य हो दक्षतापूर्वक चारों ओर से सभी गुणों को उसी प्रकार प्राप्त किया जैसे सूर्य जगत् के कल्याण के लिए रसों को चारों ओर से प्रतिदिन ग्रहण करता है ।। 23

इसके उद्यान के भाग की वसन्त सम्पत्ति के समान अमृत किरण चन्द्र की पूर्णमासी के समान आयुष्मती जिसकी विशेष शोभा को नयी जवानी की शोभा सम्यकतया अंगड़ाई (जँभाई) लेती थी ।। 24

जहाँ प्रकृति से भी श्रेष्ठ रूप में पुरुष के अशेष लक्षण निरूपित हैं, उस सांख्यविरोधी तन्त्रागमों में निरूपित महेश स्वरूप को किसी ने (जिसने) स्वयं में प्रकट किया है । (अर्थात् वह कुमार प्रकृति=नागरिकों की श्रेणी या अमात्य आदि शासन अंगों से श्रेष्ठ था वैसे ही जैसे तन्त्रागमों में पुरुष ब्रह्म प्रकृति अर्थात् माया से श्रेष्ठ निरूपित है) ।। 25

बचपन से ही जिसके अतुलनीय सौन्दर्य को अतिशय समृद्ध पाकर विधाता ने जिसे यौवन की कान्ति से सजाकर मानो दग्ध काम को पुनः सशरीरी बनाया ।। 26

जिसके नवयौवन के प्रस्फुटित होने पर भी कामभावना निरन्तर अवरुद्ध है मानो उसके सौन्दर्य को देखकर लज्जित हुआ काम अहंकारवश उसके पास नहीं आया ।। 27

जिसका रूप-लावण्य अद्वितीय रूप में उत्पन्न हुआ था उसे देखकर कामप्रिया रति प्रेम से आँखें मूँद लेती थी मानो वह यह न मान सकी कि उसके पति के रूप सौन्दर्य रुद्र नेत्राग्नि शिखाएँ चाट चुकी हैं (अथवा वह यह न मान सकी कि यह उसका पति ही है क्योंकि उसके रूप को तो रुद्र नेत्राग्नि शिखाएँ चाट चुकी थीं) ।। 28

धनु संचालन की अतिशय श्रेष्ठ शक्ति-सम्पन्न वीरोत्तम उस युवक ने अयोनिजा युवराज लक्ष्मी (युवराज पद) को अपने जनक पिता से उसी प्रकार पाया जिस प्रकार अयोनिजा सती सीता जनक के द्वारा राम को ब्याही गयी

थी ।। 29

जब से सूर्य बिम्ब के समान सुवर्ण कलश के अमृत जल से यौवराज्याभिषेक हुआ तबसे जिसकी लक्ष्मी निरन्तर विशेष वृद्धि को प्राप्त कर रही थी, उस लक्ष्मी के कारण जो शुक्ल पक्ष में निरन्तर सौन्दर्य की अभिवृद्धि को प्राप्त होते हुए चन्द्रमा की तरह हुआ ।। 30

यौवराज्याभिषेक जल से तथा मन्त्रबन्धन की मुक्ति से (अथवा मन्त्रणा बन्धन की मुक्ति से) तीव्र हुई जिसके पराक्रम की आग सम्यक् रूप में बढ़ रही थी वह मानो शत्रु आँखों के बढ़ते हुए आँसुओं से भीगे शोकाग्नि की वृद्धि से होड़ लेती हो ।। 31

अपने अंगों के सहज सौन्दर्य के कारण जो पहले से ही प्रसिद्ध था वह स्वाभाविक अलंकारों और शिष्ट वस्त्रों के धारण के कारण मनोहर या मंगलकारक सौन्दर्य वाला कहा गया ।। 32

महाभिषेक के समय जो रत्नाभूषणों को धारण किये हुए था, वह नयी-नयी शोभा को उसी प्रकार धारण किया था जैसे अगस्त्य के द्वारा समस्त जल को पान किये जाने पर बाहर निकले हुए रत्नों वाले समुद्र ने धारण किया था ।। 33

अनेक प्रकार से प्रभूत शक्तिशाली हुए शत्रुओं के द्वारा भी भय से जिसका विरोध नहीं किया गया है ऐसा जो स्वर्ण पर्वत समान उच्च सिंहासन पर निर्लिप्त होकर आसीन हुआ था ।। 34

जिसके अंगों के तुल्य निर्दोष दूसरा कोई उपमान नहीं माना गया क्योंकि आइने में प्रतिबिम्बित स्वयं उसका बिम्ब भी क्षुद्र (उल्टा चित्र देनेवाला) तथा आइने के तल के वशीभूत होने के कारण उतना निर्दोष नहीं हो सका ।। 35

जिसके अभिषेक में गिरे जल से भीगी पृथिवी समुद्र मेखला बन गयी थी तथा पृथिवी के ऊपर आवृत्तकर फैलती हुई चाँदनी की तरह जिसकी यशकान्ति एकच्छत्र सम्राट् का रजत-छत्र बन गया था ।। 36

जिसके अपने सामर्थ्य से प्राप्त सभी सम्पत्ति उसके आनेवाले दिनों की भोग की कथा कहते थे मानो श्रेष्ठ ब्राह्मणों द्वारा दिये गये उसके आशीर्वाद यथार्थ

(कार्य रूप) में अनुदित हुए थे ।। 37

आत्मदृष्टि प्राप्त जो सारे सांसारिक व्यापारों को छोड़कर पारिजात वृक्ष में रत हुए भ्रमर समूह की तरह तथा मुनियों की बुद्धि की तरह आत्मयोग में रत हुआ था ।। 38

जब तक निर्मेघ शरद ऋतु प्रकट नहीं होता तब तक स्वभाव से चंचला इधर-उधर भटकनेवाली (चमकनेवाली) बरसात की बिजली की तरह जब तक इसकी रणयात्रा आरम्भ नहीं हुई थी तब तक शत्रुओं की चंचला राजलक्ष्मी इधर-उधर चमक रही थी ।। 39

तेज हथियारों की आरती से प्रकाशित शोभावाले तथा सांग विद्याओं एवं मन्त्रों से रक्षितात्मा जो महामण्डल (एकच्छत्र सम्राट्) की दीक्षा पाकर (दीक्षा के द्वारा) प्रभूत ऐश्वर्यवाली सिद्धि की साधना की ।। 40

दिग्विजय के लिए जाती हुई जिसकी सेना के बीच पताका चल रही थी, देखकर शत्रु राजलक्ष्मी तो पहले ही चल पड़ी परन्तु सेना के भार से चँपी शत्रु की पृथिवी बाद में चली आयी ।। 41

युद्ध में मेघनाद-विजय के बाद लक्ष्मण की गर्जना को सुनकर रावण को हुए भय की तरह ही युद्ध में जिसके सिंहों की आवाज दूर से ही सुनकर शत्रु भयभीत हो गया था ।। 42

जिसकी युद्ध-यात्रा के समय सेना के पैरों से उड़ी धूल प्रचण्ड ज्वाला की धूम की तरह शत्रु स्त्रियों की आँखों में बैठकर आँसुओं से भर दिया (जलपूर्ण कर दिया) ।। 43

जिसकी रणयात्रा में ले जाया जाता हुआ सेना समूह बद्ध क्रोध की तरह ऊपर उठकर नीचे गिरते हुए धूल, पहले ही पृथिवी को सताकर उठी थी बाद में जलस्रोतों को गन्दा किया ।। 44

कहीं जिसके मारे गये राजाओं से पटा हुआ, कहीं भागती हुई जिसकी शत्रु-सेनाओं से भरा हुआ और कहीं आगे बढ़ती हुई अपनी सेना से भरा हुआ वह मार्ग कहीं गिरे हुए पाण्डव-राजाओं से पटा हुआ, कहीं स्वर्गगंगा से भरा हुआ, कहीं ऊर्ध्वगामियों से भरा हुआ स्वर्ग मार्ग का हुआ ।। 45

आकाश........आवरण (ढक्कन) जनों की चेष्टाओं में अशाक्ति प्रकाश विनष्ट जो सायंकाल के अन्धकारों से निस्तारित होता है वे सैनिकों द्वारा जो राजा शत्रुओं में किया करता था ।। 46

दोनों पक्षों में आर्त्तनाद फैलाकर रण में जो अपने वेग के कारण चीते के समान हो रहा था उस युद्ध में शत्रुओं के हाथी जिससे भयभीत हो शक्तिहीन हुए कहाँ भागे यह नहीं समझ पाने के कारण हतबुद्ध हुए खड़े-के-खड़े रह गये ।। 47

Verse 48 illegible.

शुभ्र शरत् काल को सामने आते देखकर शुष्क बेकार मेघ शीघ्र इधर-उधर समाप्त हुए से (डर या छिप) हो जाते हैं उसी प्रकार वह युद्ध में जब धनुष धारण करता है तब छोटे-छोटे राजा उस मेघ की तरह इधर-उधर छिप जाते हैं।।49

Verse 50 illegible.

सचमुच मूर्खता के कारण ही पतंगों का साम्य पाकर आनन्दित हुए थे जिसके शत्रु वर्ग क्योंकि वे बाद में उसके बाहुदण्डरूपी अरणी से प्रज्वलित अग्नि के समान पराक्रम को पाकर विपद में पड़ गये थे ।। 51

Verse 52 illegible.

अपने आसन को पाकर शत्रुओं को परास्त कर हवा के रास्ते को रोककर और मन के वेग को रोककर विजय पाकर जिस अभ्यास करनेवाले के अवस्थित रहा, आलस्य से हीन भी.......।। 53

Verse 54 illegible.

जिसके से छूटे बाण सुन्दर झंकार के साथ शत्रुओं के सिर पर गिरे थे उसके पीछे ही देव-सुन्दरियों के हाथ रूपी लता से उसके ऊपर मंदार पुष्प गिरे थे ।। 55

Verse 56 illegible.

केतु की छाया से ग्रस्त सूर्य जैसे अपने प्रकाश को नहीं छोड़ता है, वैसे ही घातक तीक्ष्ण प्रहारों से व्रणित होने पर भी तथा शत्रुओं के द्वारा युद्ध में घेर लिये जाने पर भी जिस कवचधारी ने अपना प्रकाश (शौर्य) नहीं छोड़ा ।। 57

..........बाहर निकालकर बिखरी कीर्तिवाले रावण जो दुष्ट था उसे ऊपर लाया ।। 58

....जो युद्ध में चक्रधारी भगवान् विष्णु का चक्र पाने की इच्छा न की थी न इन्द्र के वज्र पाने की भी इच्छा की थी शायद जो (वह) न झेले जाने योग्य शक्तियुक्त पाशुपतास्त्र ही पाकर शत्रुसमूह को जीत लिया था ।। 59

...........उसे तो इसकी विलासिनी नायिकाओं का कहते हुए द्वारा आराधना की गयी यह और स्वयं...........।। 60

जो शत्रु वीरों के द्वारा युद्ध में पीड़ित किये जाने पर भी गम्भीरता के कारण प्रसन्नता को न छोड़ा क्योंकि हाथियों के स्नान से झील गन्दा हो सकता है गम्भीर सागर नहीं ।। 61

........बिजली के समान फड़कती हुई साँप की जीभ के समान जीभ भी (भुजा).....।। 62

तेज तलवारों के घात-प्रतिघात से हुई हानि के कारण मुट्ठी के छोटे हो जाने से अथवा इसी भ्रम के कारण अनेक बार प्रहार करके शत्रु को गिराकर जिसने अपनी भुजाओं की बार-बार निन्दा सही ।। 63

.................सुन्दरी दिव्यांगनाओं के उतारने के लिए सीढ़ी रूप सम्पत्ति के समान जिसने किया था ।। 64

अपने पक्ष (के घेरेबन्दी) में किसी प्रकार की कमी को दूर कर जिसने अपने पक्ष की रक्षा की है तथा दूसरों के व्यूह में रहे कमी को ही सहारा बनाकर अपने पराक्रम को आगे तक बढ़ाया है उसने प्रतिभाशाली (चतुर) शत्रुओं को भी प्रतिभाहीन कर दिया है ।। 65

.............व्याप्त होने से फलत्व । विधि के विधान के योग्य विपरीत वृत्त में जो प्रयत्नवान् युद्ध में बरतता था तथा अनुकरण किया था ।। 66

आमने-सामने भिड़ने के लिए सदा उकसायी गयी शत्रु सेना ढिठाई चाहती हुई भी दूर से ही जिसे देखकर पीछे मुँह घुमा लेती है ठीक वैसे ही जैसे कोई नवेली सखियों द्वारा समझा-बुझाकर सामने ले जाने पर भी तथा ढिठाई

चाहकर भी रति काल में लज्जावश मुँह घुमा लेती है । सम्मुख रति में नहीं टिक पाती है ।। 67

.........मिले-जुले महायुद्ध में और विजय की क्रिया को नहीं व्यर्थ विक्रम रूप सम्पत्ति को प्राप्त करता है । जो युक्तियों के जानकारों द्वारा निश्चित रूप से युक्त से मुक्त है ।। 68

जिसके द्वारा शत्रु संघ के दुर्ग पर अधिकार कर लिये जाने के कारण भय से पीले पड़े देहवाले, पर्वतों में गुफाओं को भी न पाकर भय से चंचल (आकुल) दृष्टि हुए, वनों में मृग और हाथी के चर्म पहनकर रह रहे जिसके शत्रु समुदाय, निरन्तर दुर्गा के सम्पर्क में रहने के कारण पीले रंग के हुए तथा कार्तिकेय को देख आनन्द से चंचल दृष्टि हुए तथा गजासुर का चर्म धारणकर वन में रहनेवाले शिवजी के समान हुआ था परन्तु उनके समान पूज्य नहीं हो सका था ।। 69

.....वरस्य श्रेष्ठ के, जिसका मनोरथ व्यर्थ हुआ, जो पृथिवी की विजय की इच्छुकता में दाता के गुण में भी नहीं पर्याप्त रूप से, या व्यर्थ याचक नहीं होता ।। 70

प्रातःकालीन सूर्य के प्रकाश में डूबे हुए पर्वत के समान मूँगा जटित झूले पर झूलते हुए जिसके, क्षीरसागर समान शत्रु देश को भी घनघोर वन में मारे फिरने की दुर्गति के कारण लक्ष्मी छोड़ रही है ।। 71

अर्थसिद्धि प्रयोजन की सिद्धि........उद्योग से युक्त तीन गण की वृद्धि के लिए (धर्म, अर्थ, काम) की वृद्धि के लिए चारों दिशाओं में प्रणाम कर चुकनेवाले ने बचपन में विद्या के समान ग्रहण किया ।। 72

जिसका महान् यश, सभी भुवनों में फैले होने के कारण, दूसरे गुणियों के द्वारा अछूता होने के कारण तथा स्तुतियों के शब्द रूप गुण को धारण करनेवाला होने के कारण विभु, भुवनों में व्याप्त ऊँचा होने के कारण अछूता शब्द गुण को धारण करनेवाला निष्कलंक आकाश की तरह था ।। 73

.....क्षय से दुबले अंगोंवाली.........पहले सुश्रुत नामक आयुर्वेद के आचार्य के आचार-विचारों से सभी (कफ, पित्त और वात)– इन त्रिदोषों को

नाश करने में अतिशय निपुण जिसने छः प्रकार के रसों के अंगों से पृथिवी पाली थी। अच्छी तरह सुने हुए आचार और विचार से प्राकारान्तर से यह अर्थ है ।। 74

दूसरे सारे पराक्रमियों के पराक्रम को जिसने जीता था तथा जो पहले ही महामाण्डलिक था, बाद में और भी विस्तृत क्षेत्र पर अधिकार पाकर, सारे तेजों को जीतनेवाला तथा प्रकाशपूर्ण होते हुए भी दोपहर में अधिक प्रकाशपूर्ण हो जानेवाले दोपहर के सूर्य की तरह अतिशय प्रतापी हुआ ।। 75

पर्वतों के राजा को जिसने सिंह को अपने अन्दर से निकाला, तेज धामवाले जिस पर चढ़ने पर नहीं तारागण केवल अस्त होने के समान प्रकाशवाले हों गिरते राजाओं के मस्तक की मणियाँ भी वैसे ही ज्ञात हुई थीं ।। 76

बिल्कुल उजला, चन्द्रमा की तरह सुशोभित, जिस एक छत्र के महान् (बड़ा) रजत छत्र के ऊपर उठने पर ताप अशेष पृथिवी को छोड़कर शत्रु मन में समा गया ।। 77

चिर काल से जिसके रूप दर्शन की इच्छा से संसार के लोग व्याकुल थे उसे देखकर (पाकर) भी पलक गिराये बिना देखती हुई उनकी आँखें संसार की असंख्य मछलियों की आँखों की तरह हुई थी क्योंकि इच्छा बार-बार होती है, उसे पाकर भी असन्तोष बना रहता है ।। 78

सहज शोभा देखने की (रूप दर्शन की) इच्छा रखनेवाले मित्रों के बीच सुसज्जित वह, मणि दर्पणों में प्रतिबिम्बित अपनी ही छायाओं के बीच सुशोभित सा जो था ।। 79

जिसकी अत्यन्त प्रभावशाली होती हुई भी स्पष्ट (सीधी) नीति थी । परन्तु शत्रुओं की वैसी नहीं थी । हो भी कैसे टेढ़े-उल्टे चलनेवाले ग्रहों में सूर्य, चन्द्र को छोड़कर सीधी गति किसकी होती है ? ।। 80

साधन करने में उस चतुर ने प्रभावशाली मन्त्रों के मूल साम, यजुः आदि चारों वेदों में बताए गए विनाश रोकनेवाले उपायोंवाले विविध प्रयोगों के द्वारा सिद्धि का साधन किया था अथवा कार्यसाधन करने में चतुर वह दक्ष मन्त्रियों की मन्त्रणा जिसके मूल में था ऐसे, विनाशरोधी उपायोंवाले साम, दाम, दण्डादि चारों नीति के विविध प्रयोगों के द्वारा जिसने अभीष्ट साधन किया था ।। 81

जैसे मूल प्रकृति महत्तत्त्व के आश्चर्यकारक कामों का प्रदर्शन करती है तथा जगत् सृष्टि आदि कार्यों के लिए उपयोगी छः गुणों के योग से बिना वाणी के ही प्रधान प्रकृति (जगत् का अव्यक्त कारण) सत्त्वादि त्रिगुणों तथा पुरुष से अतुल्य आचरण करती है, उसी प्रकार सदा ही जिसने मूल प्रकृति अर्थात् सम्राट् की तरह आश्चर्यकारक महान् कार्यों का प्रदर्शन करते हुए, सन्धि, विग्रह, अभियान, आसन, संश्रय और द्वैधी भाव– इन षड्गुणों के योग से बिना किसी आदेश के ही प्रधान प्रकृति महामन्त्री से बहुत अधिक काम किया ।। 82

नीति-निर्धारण में सामान्यतया कुटिल मन्त्र, प्रभु उत्साह और विशेष शक्ति से सम्पन्न होने पर भी विपक्ष के लोग विनाश की बात सोचकर भय से ही जिसके अनुकूल हो गये थे ।। 83

जिस गुणवान् के धर्मार्थ काम साधक (सम्बन्धित) उत्तम गुणसमूहों द्वारा (मित्रों की तरह) भर्त्सना किये जाने पर मानो क्रोधवश दोषों ने विपक्ष के शत्रु राष्ट्रों का आश्रय ले लिया ।। 84

चन्द्रमा रात्रि के अन्धकार की सारी कालिमा को दूर कर देता है परन्तु अपने ऊपर की ही कालिमा को भूल जाता है । परन्तु यह न्यायप्रेमी अपने दोषों की कालिमा मिटाकर तुरन्त ही दूसरे के दोषों को उपायपूर्वक मिटा देता है ।। 85

जिसके निर्व्यसन होने के कारण तथा जिसके सुशासन से प्रजा विपत्ति की शंका से मुक्त हो गयी थी जबकि प्राचीन काल में अजातशत्रु के दुःशासन के कारण राजपुत्री अपार कष्ट पाई थी अथवा युधिष्ठिर के व्यसन के कारण दुःशासन के द्वारा राजपुत्री द्रोपदी अपार कष्ट पायी थी ।। 86

विनाश की परवाह न करनेवाली प्रशभशालिनी तथा कठिनाई से प्राप्त किये जाने योग्य, शत्रुओं के आधिपत्य से बाहर निकली हुई राजलक्ष्मी सुन्दर, रसज्ञ (पण्डित) जिस राजा रूप गम्भीर पात्र को पाकर जल की तरह स्थिर हो गयी थी ।। 87

जिसने शत्रुओं की ओर से आनेवाले मार्ग में चारों ओर घूमती हुई हिंसा करनेवाली उस शत्रु शक्तिरूपी सिंहनी को नष्ट कर, धर्म के योग से विकसित हुई प्रजा को लक्ष्मीरूपी पटरानी को पाकर पालन किया ।। 88

जब विद्वानों ने राजाओं को अतिक्रमण करनेवाले में अग्रगण्य कार्त्तवीर्य अर्जुन के हज़ार दोषों की गणना की (कर ही दी) तब इस सर्वगुण सम्पन्न की कथा कहने में क्या विशेष है ? (गुणों की चर्चा सहज है परन्तु दोषों की गणना कठिन है) अथवा तब यह कहना कि सारे गुण निश्चित रूप से इसमें स्थित हुए हैं कहना ही व्यर्थ है अर्थात् प्रसिद्ध ही है कि वह गुणपूर्ण है ।। 89

पृथिवी और स्वर्ग में गाये जाने पर भी कर्ण को दु:ख देनेवाले अथवा कान को कटु लगनेवाले इन्द्र के यश भी जिस प्राप्त शक्ति और संवत् वाले के कर्ण मधुर के यश के उपमायोग्य शायद न हुआ ।। 90

आकाश और दिशाओं को घेरकर गरजते हुए बादल की तरह चारों ओर फैले हुए जिसके यश की ध्वनि (गर्जना) को सुनकर दूर देशों में रहनेवाले भी न केवल रत्नों का नजराना ही दिया अपितु अतिशीघ्र ही हाथियों का समूह भी दिया ।। 91

दिशाओं को ढँक देनेवाले, एक लाख यज्ञ से उठे धुएँ से जिसने सूर्य के प्रकाश को ढककर स्वर्ग और सौ यज्ञ करनेवाले इन्द्र की कीर्ति– दोनों एक साथ ही मानो कालिख पोत दिया था ।। 92

आनुमानिकों (नैयायिकों) के द्वारा आज तक साहचर्य व्याप्ति के आधार पर वही पुराना अव्यभिचरित अनुमान (जहाँ-जहाँ धुआँ है, वहाँ आग है- यह प्रदेश धूमवान् है अत: वहाँ आग है जैसे पाकशाला में) किया जाता रहा है परन्तु जिसके यज्ञ से उठते धुएँ को देखकर उसके धर्माचरण के आधार पर नया ही अनुमान होता है– जहाँ-जहाँ धूम है वहाँ-वहाँ बरसात है, यह प्रदेश धूमवान् है, अत: यहाँ भी कामनाओं की बरसात है यथा अन्य यज्ञस्थलों में ।। 93

बिना माँगे ही रहनेवाले समुद्र जैसे पानी से भरा रहता है वैसे ही स्वयं ही सम्पदाओं से भरे रहनेवाले जिसको धनहानि हुए याचक समूह उसी प्रकार पाकर पर्याप्त पूर्ण हुए जिस प्रकार जल से रिक्त हुए बादल पुन: वर्षा के लिए समुद्र को पाकर पूर्ण हो जाते हैं ।। 94

आँखों द्वारा मनोहारी भावों को प्रदर्शित करते हुए तथा उंगलियों की शोभा के द्वारा रस से भिगाते हुए जिसके रासमण्डल नृत्य की उपमा के योग्य

हिरण के आकार के दाग से लाञ्छित चन्द्रमण्डल न हो सका ।। 95

जिसने स्वयं ही गर्वीले शत्रुओं को समाप्त कर दिया था फिर भी जिसकी छत्रच्छाया में राजा लोग दूसरे राजाओं को जीतने में लगे थे क्योंकि सूर्य के द्वारा प्रखर प्रकाश बिखेर दिये जाने पर भी क्या चन्द्रमा अन्धकार को दूर नहीं करता रहता है? ।। 96

उस प्रकार की महनीय शोभा न तो मणि दर्पण ने प्रदर्शित की थी और न उसके दूसरे ही कोई आभूषण जैसी कि राजा की आज्ञा को 'जैसी आज्ञा' कहकर अपने कानों के आभूषण बनाये, उसके आगे झुके राजाओं से प्रतिबिम्बित उसके चरण नख रूपी दर्पण ने प्रदर्शित की थी ।। 97

कला गुणों के अर्जन के द्वारा उसने जो महानता अर्जित की थी उसकी बराबरी कोई दूसरा गुणी नहीं कर सका था क्योंकि केवल नाचकर ही नृत्यव्रती नीलकण्ठ शिवजी के प्रभु सामर्थ्य को मोर नहीं पा सकता ।। 98

सारी पृथिवी जिसके शासन में थी तथा वायु की तरह सदा गतिशील, जलवत् स्निग्ध आकाश की तरह सर्वत्र व्याप्त तेज की तरह प्रचुर प्रकाश को धारण करनेवाली महाभूतमयी रूपवाली कीर्ति उसकी थी, भुवनों में सारी पृथिवी जिसकी थी अथवा (रूप उसकी कीर्ति धारण करती थी), लोकों में सारी पृथिवी जिसकी थी ।। 99

जो प्रयत्न और बुद्धि में सर्वाधिक था; दानशीलता, शौर्य, शरीर शोभा, गाम्भीर्य, माधुर्य आदि गुणों का एक ही आश्रय था, जो ब्रह्मा के द्वारा निर्मित हुआ था ।। 100

संसार में विख्यात शक्तिवाले कार्तवीर्य अर्जुन (सहस्रार्जुन) ने यदि पहले इस दो भुजाओंवाले की शक्ति को देखा होता तो अपनी रक्षा के लिए उत्पन्न हज़ार हाथों को उचित मान लेता (व्यर्थ मान लेता) ।। 101

दूर से केवल प्रताप से ही शत्रुओं को जीतनेवाले के युद्ध करते हुए कठिनाई से पकड़ में आनेवाले जिसके शत्रु, मदमत्त हुए मदगन्ध छोड़नेवाले हाथी के गन्ध से ही भयाकुल हुए दूसरे हाथी की तरह हुए ।। 102

इतर देवताओं की संगति छोड़कर जिसकी श्रेष्ठ श्रद्धा और भक्ति उत्कट

अभिलाषा से देवाधिदेव महादेव जी को गंगा और पार्वती की तरह प्राप्त हुई थी ।। 103

सुन्दरता की सृष्टि.......ब्रह्म उत्पन्न रूप ही रूपवाले जिस एक खम्भे को पृथिवी......।। 104

इस प्रकार बनाये हुए कामदेव को तो शिवजी ने जला दिया मानो इसी विचार से प्रभु सामर्थ्य के साथ ब्रह्मा ने जिसे अति सुन्दर बनाया था ।। 105

.................विद्या.............चार मुखोंवाले ब्रह्मा को ।। 106

दोनों पत्नियों में से लक्ष्मी हृदय में छिपाकर तथा कीर्ति को बहुत दूर समुद्र पार भेजकर युवा होते हुए भी जिसने वृद्ध विद्या के साथ रमण किया ।। 107

पहले दिलीप ने वसिष्ठ की नन्दिनी (कामधेनु की पुत्री) गाय की रक्षा की थी । पुत्र की (प्रजा, सन्तान) की इच्छा से और महाराज अपने बल-वीर्य से प्रजा को प्राप्त करके भृगु सम्बन्धी..............।। 108

जिसकी कीर्ति की क्षीरसागर में भुवनों को डुबा देनेवाले ज्वार के भय से ही मानो पृथिवी छाया के बहाने चन्द्रमा में आश्रय लिया है ।। 109

हजार भोगों से अतिशय युक्त..........एवं भव भी जो अनन्त गुणों से युक्त भी विशेष रूप से नम्रता की तकलीफ के हितकारी अतिशय रूप से था ।। 110

समुद्र की घेरारूपी मेखला (को धारण करनेवाली पृथिवी) से सुशोभित पृथिवी को अधिकृत करनेवाले जिस महान् एकच्छत्र सम्राट् के द्वारा भूधर-सम्राट् सुमेरु (हिमालय) भी व्यर्थ किया गया ।। 111

कलिकाल के दुराचरणरूपी काँटों से लड़खड़ाते हुए पैर तोड़ा गया धर्म जिसे पाकर सुस्थिर और कृतार्थ हुआ ।। 112

जिस राजा के वीर्य-बल रूपी अग्नि से उठे हुए धाम रूप धुएँ रूप ध्वज से युद्ध में शत्रु की स्त्रियों का रुका हुआ भी आँसुओं का प्रवाह बढ़ गया था ।। 113

युद्ध में शक्तिरूपी वायु उद्धत हुआ, जगत् में आग के समान तेजस्वी जिस सम्राट् ने बिना धुआँ के ही शत्रुओं की स्त्रियों की आँखों में आँसू के धार को बढ़ाया ।। 114

रणभूमिरूपी नन्दन वन में फैले रक्त लिप्त तलवार के पत्ते से जिसकी भुजारूपी कल्पवृक्ष ने दिशाओं में कीर्ति पुष्प बिखेरे ।। 115

जिसके रणाभियान में चमकते हुए विशाल दाँतोंवाले हाथियों में श्रेष्ठ हाथी के दाँतों से चोट खायी पृथिवी ने मानो क्रोध से उड़े हुए धूल से उन विशाल प्राणियों को धूल धुसरित की ।। 116

मन्त्र साधन से पूरा हुआ (मन्त्रणा से पूरा हुआ) रण यज्ञ में तलवाररूपी अग्नि में शत्रु मुख कमलों का होमकर जिसने साम्राज्य उत्पन्न किया ।। 117

मज़बूत भी निडर जीव (द्रव्य भी) ऊँचा भी उखाड़ने पर............जो अनन्त वीर्य-बलवाले के द्वारा मथने पर भी जो राजाओं के समूह से नहीं नष्ट हो सका था ।। 118

जिसकी तेजाग्नि से बार-बार व्याकुल हुई प्यासी शत्रु राजलक्ष्मी जिसके सरोवर से उत्पन्न धारा को पाकर (जिसकी तलवार की धार से उत्पन्न धारा को पाकर) तुरन्त ही नहीं अपने को उसमें गिरा दिया था ।। 119

जिसके चरण रूप कमल की धूल चरित की नकल के समान....... राजाओं के मस्तकों पर चरण देकर के श्रीलक्ष्मी को जिसने धारण किया था ।। 120

परास्त करनेवाली उड़ती नज़रों से स्त्री की नाईं पेट की आग से प्रजाजनों को पाया था । और जो हरि भगवान् हैं वे हृदय से ही ईश हैं, सुन्दर बोधवाले के द्वारा स्पष्ट रूप से उनका पुरुषार्थ ज्ञात है ऐसा ही वह राजा हृदय से ही राजा के पद पर रहकर प्रजा का स्वामी था ।। 121

गर्वीले प्रधान शत्रु को समर में जीतकर जिसने कृपा की थी उस शत्रु के समूह पर........सिंह से जैसे फोड़े गये गजमस्तक रूप कुम्भवाले हाथी पर जैसे सिंह कृपा करता है ।। 122

तीस से अधिक प्रिय को गुणों से युक्त बाणों से बाँध करके कोमल बाणों से जिसने शत्रुओं को जीतकर के सद्गुणों के समान अर्थों को भोगा था ।। 123

नीलकण्ठ शिव ने अपने कण्ठ के गहने के लिए विष पी लिया था । देवों के या विशिष्ट कोटि के विद्वानों...........के लिए तो...........उद्गार निकाला था वचन रूप अमृत को ।। 124

जिसके निरन्तर यज्ञों से ऊपर उठते धुएँ से रुद्ध दृष्टि हुआ सूर्य आज भी मानो दिशाओं के सम्यक् भ्रान्त हुआ सा अपने को मानकर अपनी लीक से ही बँधा चल रहा है ।। 125

वह....जो.........धाम.........तेज.........जो शत्रु रूप लकड़ियों में लकड़ी रूप यज्ञ में पूरी दक्षिणा जो क्षीण नहीं है ऐसी पूरी कीर्ति को रूप दक्षिण दिशा रूप ब्राह्मणों को दी थी ।। 126

अस्त्रों को छोड़कर प्रणाम करनेवाले शत्रुओं के लिये ही जिसने धनुष की डोरी शिथिल की थी न कि धनुष धारण करनेवालों से विरति हुई थी ।। 127

जिसकी भुजा सुडौल और मित्रों का उपकारक भी था रण में सदा ही शत्रुओं और मित्रों को समझा था ।। 128

शत्रु जाति की एक ही द्रव्य को आश्रय कर रहने की इच्छा को जानकर धनुर्धारियों के लिए योग्य कर्म को जिसने विशेष प्रकार से किया ।। 129

शिवजी के प्रति दृढ़ भक्ति-भावना जिसकी हृदयगुहा में बैठी थी मानो उन्हीं शिवजी के तीसरे नेत्र की अग्नि के भय से ही वहाँ दूसरे देवता प्रवेश नहीं किये ।। 130

सुन्दरियों के हृदयरूपी उद्यान में घुसे चोर कामदेव को सजा देने की इच्छा से (मारने की इच्छा से) जिसने बार-बार प्रवेश किया ।। 131

